॥ श्रीः ॥

हरिदास संस्कृत ग्रन्थमाला

१९९

॥ श्रीः ॥

महाभाष्य-प्रकाशः

(नवाह्निक-प्रश्नोत्तरी)

लेखकः

न्याय-व्याकरणाचार्यः

श्री पं० मधुकान्त झा 'मधुपः'

प्रस्तावनालेखकः

श्री पं० महेश झा प्रधानाचार्यः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

१९८६

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : चौखम्बा प्रेस, वाराणसी
संस्करण : तृतीय, वि० सं० २०४३
मूल्य : रू० [illegible]-००

K. 37/99, Gopal Mandir Lane
Post Box 1008, Varanasi-221001 (India)
Phone : 63145

प्रधान वितरक
कृष्णदास अकादमी
पो० बा० नं० १११८
चौक, (चित्रा सिनेमा बिल्डिंग), वाराणसी-२२१००१
(भारत)

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : चौखम्बा प्रेस, वाराणसी
संस्करण : तृतीय, वि० सं० २०४३
मूल्य : रु० [illegible]-००

K. 37/99, Gopal Mandir Lane
Post Box 1008, Varanasi-221001 (India)
Phone : 63145

प्रधान वितरक

कृष्णदास अकादमी

पो० बा० नं० १११८
चौक, (चित्रा सिनेमा बिल्डिंग), वाराणसी-२२१००१
(भारत)

प्रस्तावना

[न्याय-व्याकरणाचार्य श्री पण्डित महेश झा
प्रधानाचार्य-विक्रमशिला वैदिक संस्कृत महाविद्यालय,
सुलतानगंज, भागलपुर]

अये सुरभारतीश्रियं कामयमानाः सहृदया मनीषिणः सदन्तेवासिनश्च !

नाविदितमिदं तत्रभवतां भवतां यन्निखिलभारतीयभाषाप्रपञ्चानामियमेव संस्कृतगीः समादरणीया जननीति । सेयममरवाणी स्वीयललितकलया सौष्ठवौदार्यसम्पदा च केषामन्तःकरणं लौहधातुमयस्कान्तमणिरिव नाकर्षतीति ।

अस्मिन्नेव संस्कृतसाहित्ये सर्व एव हृद्या लौकिका अलौकिकाश्च विषयाः समुल्लसन्तीत्यपि नागोचरं केषाञ्चनापि विवेकिनां विपश्चिताम्। तेषु वेदास्तदङ्गानि च प्राधान्यमादधते । वेदाङ्गेषु च व्याकरणमेव अङ्गेषु मुखमिव मुख्यमित्यपि श्रीमता भास्कराचार्येण प्रतिपादितम् । तद्यथा—

"यो वेद वेदवदनं सदनं हि सम्यक्
ब्राह्मयाः स वेदमपि वेद किमन्यशास्त्रम् ।
यस्मादतःप्रथममेतदधीत्य धीमान्
शास्त्रान्तरेषु भवति श्रवणाधिकारी ॥" इति ।

किञ्च—

"इन्द्रश्चन्द्रः कासकृत्स्न्यापिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टौ हि शाब्दिकाः ॥"

इत्युक्त्याऽष्टविधेषु व्याकरणेषूग्रतपः समाराधितमहेश्वरप्रसादीकृतमिदं पाणिनीयव्याकरणमेव मूर्द्धन्यतामाटीकत इत्यपि निश्चप्रचं सुधियाम्। तथा चोक्तम्--

"पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।
सर्वोपकारकं ग्राह्यं कृत्स्नं, त्याज्यं न किञ्चन॥" इति।

तस्यैतस्य पाणिनीयव्याकरणस्य विवरणभूतं महर्षिपतञ्जलिविनिर्मितं महाभाष्यं सर्वातिशायि निगूढतत्त्वप्रकाशकं व्याकरणेषु।

अतो विशेषवैदुष्याभिव्यञ्जकस्यार्षग्रन्थस्यास्यानुशीलनशीलानां विस्तृतविषमफक्किकोर्मिजालदुस्तरनिबन्धाम्भोधेः पारं जिगमिषूणामन्तेवासिनां गूढतत्त्वज्ञानाय लेखनकलासौकर्यातिशयव्यञ्जनाय च प्रश्नोत्तररूपमहाभाष्यप्रकाशाख्यं लघुतरमिमं ग्रन्थं सम्पाद्य न्यायव्याकरणाचार्य--झोपाह्व श्री पण्डित मधुकान्तशर्मा परीक्षार्थिनः नितरामुपाकार्षीत्। तस्य विदुषः सुपरिश्रमफलीभूतेयं कृतिः कृतिनां स्वान्तं नितान्तमाह्लादयिष्यतीति दृढतमो मे विश्वास इति।

श्रीरामजन्मोत्सवः
वि० सं० २००७

—महेश झा

संक्षिप्तप्रश्नानुक्रमणिका

पृष्ठ०

प्रथमाह्निके—

द्वितीयाह्निके—

तृतीयाह्निके—

सप्तमाह्निके—

अष्टमाह्निके—

॥ श्रीवाचे नमः ॥

महाभाष्यप्रकाशः

श्रीमहेश-दयाञ्जनेन विकसित-मति-नयनेन ।
भाष्यप्रकाशः क्रियते छात्र-मुदे मधुपेन ॥ १ ॥

अथ प्रथमाह्निकम्

प्रश्नः—१. व्याकरणाध्ययनस्य मुख्यं प्रयोजनं प्रयोजनप्रयोजनानि चाभिधाय कानि पुनः शब्दानुशासनस्य प्रयोजनानीति प्रश्ने बहुवचनमुत्तरे चैकवचनमिति भाष्याशयं प्रकटयत ? ।

उत्तरम्—अनुशिष्यन्तेऽपशब्देभ्यः पृथक्कृत्य कथ्यन्ते साधुशब्दा अनेनेति शब्दानुशासनं नाम शास्त्रमिति प्रतिज्ञया साधुशब्दज्ञानं व्याकरणाध्ययनस्य मुख्यं प्रयोजनमिति लभ्यते, साधुशब्दज्ञानस्य व्याकरणाधीनत्वात् । प्रयोजनप्रयोजनानि तु देवा अदुह्र, उद्ग्राभं निग्राभमित्यादौ क्रमेण तलोप—रुडागम—भकारादेशान् दृष्ट्वाऽपि लोपागमवर्णविकारज्ञोऽसंदिहानः सम्यग् वेदान् परिपालयिष्यतीति रक्षा, प्रकृतिवद्विकृतिः कर्त्तव्येति मीमांसकसिद्धान्तेन "अग्नये त्वा जुष्टं निर्वपामी"ति प्रकृतिवत् प्रकृतिप्रत्ययविभागज्ञेन "सौर्यं चरुं निर्वपेदि"त्यत्र सूर्याय त्वेत्यादिमन्त्र उह्यत इति ऊहः, वाक्यार्थज्ञानोपयोगिपदार्थज्ञानप्रयोजकव्याकरणज्ञानस्याऽसत्त्वे वेदार्थावगमाऽसत्त्वे च प्राप्तप्रत्यवायस्य परिहारकतया नित्यविधित्वेन "ब्राह्मणेन निष्कारण" इत्याद्यागमः, गुरुभूतप्रतिपदपाठापेक्षया व्याकरणाधीनप्रकृतिप्रत्ययविभागेन शब्दज्ञाने लाघवतया लाघवम् । स्थूलपृषतीमित्यादौ बहुव्रीहिस्तत्पुरुषो वेति सन्देहस्य प्रागभावाय व्याकरणज्ञानाधीनस्वरज्ञानस्यावश्यकतया असन्देह इति ।

भाष्ये प्रयोजनशब्दः करणव्युत्पत्त्या प्रयोजकपरोऽपि "नपुंसकमनपुंसकेनेत्येकशेषः" । तत्रैकवद्भावस्य वैकल्पिकत्वेन प्रश्ने एकवचनमुत्तरे च बहुवचनमिति भाष्याशयः ।

प्रश्न:—२. व्याकरणस्यानुषङ्गिकाणि फलानि प्रदर्श्य तेऽसुरा इत्यादीनामानुषङ्गिकत्वं कथम्? कथञ्च रक्षोहागमादीनां प्रधानत्वं, कथं वा रक्षोहागमादीनां प्रथममभिधानमित्यादिशङ्कां समादधत।

उत्तरम्—हे अरयो हे अरय इति प्रयोक्तव्ये वाक्यद्विर्वचनेन लत्वकरणेन च निन्दितत्वमिति तदपनोदाय व्याकरणमध्येयमिति, "तेऽसुरा:" इन्द्रशत्रुर्वर्द्धस्वेत्यत्र शातयितृपरकशत्रुशब्देनेन्द्रशब्दस्य तत्पुरुषेणान्तोदात्तत्वे कर्त्तव्ये बहुव्रीहिणाऽऽद्युदात्तत्वं कृतवता ऋत्विजा यजमानो विनाशित इति दुष्टशब्दवारणद्वारा यजमानरक्षणमस्य प्रयोजनमिति "दुष्ट: शब्द:" अर्थज्ञानपूर्वकशब्दप्रयोग एव धर्म इत्यर्थज्ञानस्य व्याकरणाधीनत्वेन सुशब्दप्रयोगार्थं निषिद्धाध्ययननिवृत्त्यर्थं च व्याकरणमिति "यदधीतम्" अपशब्दप्रयोगस्याधर्मजनकत्वेन लक्षणस्मरणपूर्वकसुशब्दप्रयोगस्यानन्तफलजनकत्वेन चादृष्टद्वारा पुरुषार्थसाधकं व्याकरणमिति "यस्तु प्रयुङ्क्ते" नाम्नष्टे: प्लुतिज्ञानस्य व्याकरणज्ञानाधीनत्वेनाशीर्वादवाक्ये नाम्नष्टे: प्लुतिमकुर्वत: स्त्रीसादृश्यवारणाय व्याकरणमिति "अविद्वांस:" प्रयाजमन्त्रे ऊह्यमानाग्निशब्दप्रकृतिकविभक्तिज्ञानं व्याकरणेन सिद्धयतीति "विभक्तिं कुर्वन्ति" साकच्कव्यञ्जनरूपाक्षरज्ञानं पदज्ञानं वाक्यज्ञानं च व्याकरणज्ञानाधीनमिति "यो वा इमाम्" चतुर्विधज्ञानं कालत्रयज्ञानं व्यङ्ग्यव्यञ्जकशब्दज्ञानं सप्तविभक्तिज्ञानं वर्णानामुर:कण्ठशिरोरूपस्थानत्रयज्ञानं च व्याकरणाधीनमिति तज्ज्ञस्य शब्दब्रह्मणाऽभेदाध्यवसायेन मोक्षपदजनकत्वमस्येति "चत्वारि" अर्थो हि वाच: शरीरमित्यर्थविदमेव वैयाकरणं ब्रह्मरूपा वाग् स्वीकरोति नान्यमिति मोक्षसाधकं व्याकरणमिति "उत त्व:" शब्दापशब्दसमूहाद्व्याकरणज्ञानेन परिशोध्यापशब्दान् विहायैव सुशब्द: प्रयोक्तव्य इति "सक्तुमिव" आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयो मा भूदिति "सारस्वतीम्" नामकरणे घोषवदाद्यन्तरन्त:स्थादिज्ञानं व्याकरणाधीनमिति "दशम्यां पुत्रस्य" यथा वरुणस्य सत्यदेवत्वं तथा सप्तविभक्तिज्ञानेन व्याकरणज्ञस्यापि इति वरुणवत् स्वर्गवासितया स्वर्गफलं व्याकरणाध्ययनस्येति "सुदेवोऽसि" इत्यानुषङ्गिकाणि प्रयोजनानि।

बहिरङ्गशब्दापशब्दप्रयोगविधिनिषेधविषयत्वेनैषामानुषङ्गिकत्वम्। आनुषङ्गि-

कत्वादेवैषां वर्गद्वयोपादानम् । पदपदार्थज्ञानाधीनत्वेनान्तरङ्गतया रक्षोहागमादीनां प्रधानत्वम् । प्रधानत्वादेवास्य प्रथमोपादानमिति दिक् ।

प्रश्नः—३. शब्दस्वरूपं प्रतिपाद्याऽथ गौरित्यत्र कः शब्द इति प्रश्नोत्थानबीजं, यर्त्ताह भिन्नेष्वभिन्नमित्यादौ केन किमभिहितमिति च निरूपणीयम् ?

उत्तरम्—गौरिति शब्दाभिलप्ये ज्ञाने प्रतिभासमानेषु शब्दपदाभिधेयो न सास्नादिमदर्थरूपं द्रव्यं नापीङ्गितादिरूपक्रिया, न च शुक्लादिरूपो गुणो न पुनर्भिन्नेष्वभिन्नं छिन्नेष्वछिन्नं सामान्यस्वरूपं गोत्वादिकम् । तेषां श्रोत्रेन्द्रियाग्राह्यत्वात् । अपि तु अभिव्यञ्जकवशात् प्रकाशितेन येन सास्नादीनां सम्प्रत्ययो भवति स शब्दः । यदि स्फोटात्मकशब्दस्य लौकिकबहिर्भूतत्वेन तदनुशासने लौकिकानामिति प्रतिज्ञाविरोध इत्युच्यते तदा लोके व्यवहर्त्तृषु पदार्थबोधकत्वेन प्रसिद्धो वैखरीनादः शब्दपदव्यवहारविषयः ।

अयं गौरयं शुक्ल इति व्यवहारे शब्दार्थयोरभेददर्शनेन शब्दस्वरूपनिर्धारणमेवायं गौरित्यादिभाष्योत्थानबीजम् । अत्र भिन्नेष्वभिन्नमित्यनेन सामान्ये एकत्वमभिहितम् । छिन्नेष्वछिन्नमित्यनेन नित्यत्वम्, सामान्यभूतमित्यनेन च गोत्वादेः सत्ताख्यसामान्यस्वरूपत्वं बोधयतीति दिक् ।

प्रश्नः—४. किं पुनराकृतिः पदार्थः आहोस्विद् द्रव्यम्, इति वार्तिकोत्थानबीजम् । उभयोराश्रयणे मानञ्चोपपाद्य सिद्धे शब्दे अर्थे सम्बन्धे चेति विग्रहः कस्मिन्पक्षे युज्यत इति विशदं व्यवस्थापयत ।

उत्तरम्—आक्रियते व्यवच्छिद्यते स्वाश्रयोऽनयेत्याकृतिर्जातिरित्युपसर्गापवादयोर्लक्षणयोः प्रणयनं किं जातिपक्षमाश्रित्य व्यक्तिपक्षमाश्रित्य वेति पृच्छति—किं पुनरिति, जात्याख्यायामिति सूत्रप्रणयनमाकृतिपक्षे, सरूपसूत्रप्रणयनं च व्यक्तिपक्षे मानम् । तत्र द्रव्यस्यानित्यत्वेनाकृतेश्च नित्यत्वेनाकृतिपक्ष एव सिद्धे शब्दे इत्यादिविग्रहो युज्यते । ननु मृत्कयाचिदाकृत्या युक्ता पिण्डो भवति पिण्डाकृतिमुपमृद्य घटिकाः क्रियन्त इत्यादौ आकृतेरन्यान्यतया तत्पक्षेऽप्येष विग्रहो न युज्यत अर्थस्यानित्यत्वेन तन्निष्ठतादात्म्यस्याप्यनित्यत्वादिति चेन्न । एकत्र व्यक्त्यावयवसंस्थानरूपाऽऽकृतेर्नाशेऽपि व्यक्त्यन्तरे तद्दर्शनेन प्रवाहाविच्छेदाध्वंसाप्रतियो-

गिसजातीयकत्वरूपनित्यत्वस्याऽऽकृतौ सुघटत्वेनावयवसंस्थानरूपाऽऽकृतेरपि नित्यत्वात् । यदि चासत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं द्रव्यपदवाच्यं तदा द्रव्यपक्षेऽपि सिद्धे शब्द इत्यादिविग्रहो न्याय्य इति दिक् ।

प्रश्नः—५. सिद्धे शब्दार्थसम्बन्धे इति वार्त्तिकं सावतरणं व्याख्यायताम् ।

उत्तरम्—शब्दार्थसम्बन्धानामाचार्य एव स्रष्टा स्मर्त्ता वेत्याशङ्क्य समाधत्ते "सिद्धे शब्दार्थसम्बन्धे" इति शब्दार्थसम्बन्धं नित्यं मत्वा पाणिनिना लक्षणं प्रारब्धमिति स्मर्त्तैवाचार्य इत्युत्तराभिप्रायः । अत्र सिद्धा द्यौरित्यादिवन्नित्यपर्यायवाचिसिद्धशब्दग्रहणम् । न तु सिद्ध ओदन इत्यादिवदनित्यपर्यायवाचिनः । संग्रहे 'किं कार्यः शब्दोऽथ सिद्ध." इति पक्षद्वयविचारे नित्यपरतयैव सिद्धशब्दोपादानात् । अथवा अब्भक्षयो वायुभक्ष्य इतिवत् सिद्ध एव न साध्य इत्यवधारणात्, देवदत्तो दत्त इतिवदत्यन्तसिद्धः सिद्ध इति पूर्वपदलोपाद् व्याख्यानाच्च नित्यपर्यायवाचिन एव ग्रहणम् । ननु संदिग्धसिद्धपदं विहायासंदिग्धनित्यपदमेव कथं नोपात्तमिति चेन्न, नित्यपदोपादानेऽपि नित्यप्रहसित इत्यादौ आभीक्ष्ण्येऽपि नित्यशब्ददर्शनेन संशयवारणाय व्याख्या नच इत्यत्रैवानुसरणीयतया मङ्गलार्थं माङ्गलिकसिद्धशब्दोपादानस्यैवोपयुक्तत्वादिति दिक् ।

प्रश्नः—६. ध्रुवं कूटस्थमविचाल्यनपायोपजनविकार्यनुत्पत्त्यवृद्ध्यव्ययोगियत्तन्नित्यमिति नित्यलक्षणे केनांशेन कीदृशानित्यता परिहृतेति स्फुटं प्रतिपाद्यत ।

उत्तरम्—त्रिविधा चानित्यता संसर्गाऽनित्यता, परिणामानित्यता, प्रध्वसानित्यता च । स्वरूपतिरोधानेन पररूपावभासः प्रथमा । यथा लाक्षाद्युपधाने स्फटिकस्य । परिणामानित्यता यथा बदरीफले श्यामतातिरोभावेन लौहित्याऽऽविर्भावः । सर्वात्मना विनाशश्च तृतीया । तत्र कूटस्थमित्यंशेन संसर्गानित्यता, अविचालीत्यनेन परिणामानित्यता, अनपायेत्यादिना प्रध्वसानित्यता परिहृता । अनित्यभाववृत्ति जायते अस्ति, वर्द्धते, विपरिणमते, अपक्षीयते, नश्यतीति षड्विधविकाराणां प्रत्येकं क्रमेण अनपायेत्याद्यंशेन व्यावृत्तिरिति दिक् ।

प्रश्न:—७. लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियत इति वार्त्तिकं शङ्कासमाधानपुरस्सरं व्याख्याय धर्मनियमः इत्यत्र त्रिविधसमासाभिप्रायम्, प्रियतद्धिता दाक्षिणात्या इत्यत्र प्रियतद्धितत्व-बीजञ्च प्रदर्शयत।

उत्तरम्—ननु प्रवाहनित्यतया जातिलक्षणस्य स्वाधिष्ठानभूतं ब्रह्म व विशेष्यं विशेष्यमेव च द्रव्यम् इति द्रव्यलक्षणस्याचार्यस्य, व्यवहारपरम्पराऽनादित्वेन सम्बन्धस्य च नित्यत्वेऽपि शब्दस्य तु व्याकरणनिष्पाद्यत्वेन कथं तस्य नित्यत्वमिति चेन्न। कुलालमुखापेक्षिघटार्थिवन्न शब्दात् प्रयुयुक्षमाणो वैयाकरणकुलं गत्वाऽऽह—कुरु शब्दान् प्रयोक्ष्य इति, किन्तु तत्रागत्यैवार्थान् बुद्धिविषयीकृत्य शब्दान् प्रयुञ्जत इति तस्यापि लोकत एव नित्यत्वसिद्धेः। ननु लोकस्य प्रमाणत्वे शास्त्रमेव व्यर्थम्, लोकत एव शब्दप्रयोगसिद्धत्वादिति वाच्यम्। अभक्ष्यो ग्राम्यसूकरः इत्यनेन रागतः प्राप्तभक्षणविधिनिदमस्याभ्युदयकारित्वस्समानायामर्थावगतावपि प्रकृति-प्रत्ययविभागज्ञानद्वारा शब्देनैवार्थोऽभिधेयो नावशब्देनेति धर्मनियमाय शास्त्रसाफ-ल्यात्। धर्माय नियम इत्यनेन प्रत्यवायपरिहाररूपधर्मायायं नियम इति व्यज्यते। असाधुप्रयोगेऽधर्मोत्पत्तेः। धर्मार्थो नियम इत्यनेन धर्मस्य यज्ञादेरङ्गभूतत्वं कथ्यते। नानृतं वदेदिति क्रत्वङ्गवाक्येन क्रतुवैगुण्यस्य बोधनात्। धर्मप्रयोजनो नियम इत्यनेन एकः शब्द इति श्रुतेर्नियमादृष्टं पुरुषार्थकरं सूचयतीति। लोकवेदरूप-समुदायावयवयोराधाराधेयभावकल्पनं प्रियतद्धितत्वबीजम्। यथा कश्चिद्वनस्पतय इति कश्चिच्च समूहप्रत्ययान्तं वानस्पत्यमिति प्रयुज्यत इति दिक्।

प्रश्न:—८. किं पुनः शब्दज्ञाने धर्मः आहोस्वित् प्रयोगे ? इति शङ्कां समादधत।

उत्तरम्—नन्वेकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवतीति श्रुतौ सुप्रयोगात् सम्यग्ज्ञातत्वानुमानेन सम्यग् ज्ञातः कामधुग् भवति ? किं वा सम्यग्ज्ञानात् सुप्रयोगानुमानेन सुप्रयुक्तः कामधुग्भवतीत्यर्थः। नाद्यः, शब्दज्ञाने धर्मवदपशब्दज्ञानेऽधर्मस्यापि सम्भवेनाऽपशब्दबाहुल्यादधर्माधिक्यस्यैव सम्भवात्। तेऽसुरा हेलयो हेलय इत्यादि श्रुत्या प्रयोगादेवाधर्मवद्धर्मोऽपीति ज्ञाने धर्म इति वेदविरुद्धत्वाच्च। नापि द्वितीय, अकृतप्रयत्नस्यापि प्रयोगप्रवीणस्य

फलसम्भवेन शास्त्रवैयर्थ्यात्। एवं तर्हि न ज्ञाने धर्मो नापि प्रयोगे, किन्तु योऽग्निष्टोमेन यजते य उ चैनं वेदेतिवच्छास्त्रज्ञानपूर्वकसुशब्दप्रयोग एव। एकः शब्द इत्यादि श्रुतौ शास्त्रान्वितत्वं सुप्रयुक्तत्वञ्चेत्युभयमुद्दिश्यैव कामधुक्त्वस्य विधानात्। अथवा शब्देन शब्दज्ञाने धर्मप्रतिपादनेनाऽपशब्देऽधर्मप्रतिपादनात् सुशब्दज्ञानेऽपशब्दज्ञानस्य सहकारिकारणतयाऽपशब्दज्ञानपूर्वकसुशब्दज्ञाने धर्मस्वीकारात्। कूपखानकन्यायेनाऽपशब्दजन्यदोषनाशाच्च ज्ञानेऽपि धर्मस्वीकारे क्षतिविरहः। हेलयो हेलय इत्यादिश्रुतिविरोधस्तु न, यर्वाणस्तर्वाण इत्यादौ दोषादर्शनेनोक्तश्रुतेर्यज्ञकर्मण्येव नियामकत्वादिति दिक्।

प्रश्नः—९. व्याकरणपदार्थस्य कः पदार्थः? इति निरूपणीयः।

उत्तरम्—न चान्तरेण व्याकरणमित्यादौ व्याकरणपदार्थो यदि सूत्रम् तदा व्याकरणस्य सूत्रमित्यादौ षष्ठ्यर्थोऽनुपपन्नः। अभेदे षष्ठ्यभावात्। उदाहरणप्रत्युदाहरणवाक्याध्याहाररूपव्याख्यानं विना सूत्रत एव शब्दप्रतिपादनासम्भवेन व्याकरणाच्छब्दान् प्रतिपद्यामह इति व्यवहारानुपपत्तिश्च। नापि शब्दोऽपि व्याकरणपदार्थः। तथा सति व्याकरणे भवो योग इत्यशब्दभवो योग इत्यस्यायुक्तत्वेन भवार्थकतद्धितस्य पाणिनिना प्रोक्तं पाणिनीयमित्यत्र पाणिनिना सूत्राप्रोक्तत्वात् प्रोक्तार्थकतद्धितस्य चानुपपत्तिः स्यात्। एवं तर्हि लक्ष्यलक्षणसमुदितमेव व्याकरणपदार्थः। न चैवं केवलमधीतसूत्रोऽपि वैयाकरण इति व्यवहारानुपपत्तिः समुदाये प्रवृत्तस्य शब्दस्यैकदेशे प्रवृत्त्यसम्भवादिति वाच्यम्। पटैकदेशे दग्धे पटो दग्ध इतिवत् समुदाये प्रवृत्तस्याप्येकदेशे प्रवृत्तिसम्भवात्। यदि च राहोः शिर इतिवदौपाधिकभेदमादाय व्याकरणशब्देन शास्त्रस्य व्याकृतिक्रियायां करणत्वं सूत्रशब्देन समुदायरूपतेत्युच्यते तदास्तु सूत्रमेव व्याकरणपदार्थः। शब्दाप्रतिपत्तेस्तु सम्भव एव न, पदच्छेदादिभिः सूत्रार्थस्यैवाभिव्यञ्जितस्य व्याख्यानेन प्रतिपादनादिति दिक्।

प्रश्नः—१०. वर्णसमाम्नायोपदेशप्रयोजनम्, तत्र प्राप्तदोषवारणं च भाष्योक्तदिशा दर्शयत।

उत्तरम्—ननु लोकप्रसिद्धमातृकापाठेनैव वर्णज्ञानसम्भवात् वर्णसमाम्नायेन कस्यचित् साधुत्वाऽप्रतिपादनाच्च वर्णोपदेशो व्यर्थ इति चेन्न। अजादिसंज्ञाद्वारा

लाघवेन शास्त्रप्रवृत्त्यर्थमनुबन्धकरणार्थञ्चानुपूर्व्येण वर्णोपदेशस्यावश्यकत्वात् । न ह्यनुपदिश्य वर्णाननुबन्धाः शक्या आसङ्क्तुम् । किञ्च कलादिदोषरहितेष्टवर्णानिष्टा वर्णाः शक्या विज्ञातुम् । नन्विष्टबुद्ध्यर्थं वर्णोपदेश इति चेत्तदोदात्तादीनामप्युपदेश आवश्यकः । वर्णसमाम्नाये आकृतिपक्षाश्रयणे न तेषां ज्ञानोपपादादाने तु संवृतादि-दोषयुक्तानामपि वर्णानां ज्ञानापत्तिः । न चैतद्दोषवारणाय अ अ इतिवत्तदन्ते सर्वा अज्व्यक्तयो हल्व्यक्तयश्च शुद्धा एव पठिष्यन्ते तैः संवृतादिदोषविशिष्टस्थाने शुद्धा-नामेव वर्णानामकारादीनां विधानेन संवृतादिदोषनिवृत्तिः । नैवं करणेन गौरव-मपि । सम्पूर्णाष्टाध्यायीं प्रति तेषामसिद्धत्वेन शास्त्रदृष्ट्या कलादिदोषसत्त्वात् कलादारमनेपदम्, धमातकर्तृगामिनि क्रियाफले, इत्येवं सूत्रकरणेनेष्टसिद्धौ शीङादौ सर्वानुबन्धप्रत्याख्यानेन इत्संज्ञालोपयोरकरणेन च प्रत्युत लाघवादिति वाच्यम् । वर्णसमाम्नायसमर्थनाय प्रवृत्तस्यैकदोषवारणाय सकलशास्त्रस्य गुरुप्रकारेणान्यथा-करणे वृश्चिकभियेत्यादिन्यायापातादिति चेन्न । श्वेतो धावतीतिवत्तन्त्रेण गर्गा-गर्गादिविदादिपाठस्य प्रयोजनद्वयसम्पादकतया गर्गादीनां साधुत्वविधानवत् कला-दिदोषनिवृत्तेरपि सम्भवेनाकृत्युपदेशसमाधानसौष्ठवात् । अथवा धात्वागमविकार-प्रत्ययप्रातिपदिकानां शुद्धानामेव पाठेन तत्स्थत्वाच्च वर्णानामपि शुद्धानामेव ग्रहणेन अगृहीतप्रातिपदिकानामपि शशः षषः इति मा भूदिति स्वरवर्णानुपूर्वी-ज्ञानायोपदेशस्यावश्यकतया शुद्धानामेव तेषां ग्रहणेन च दोषाणां सम्भावनमपि नेति दिक् ।

अथ द्वितीयाह्निकम्

प्रश्नः—११. वर्णसमाम्नाये अकारस्य विवृतोपदेशप्रयोजनमभिधाय तत्र विवृतत्वे प्रतिज्ञाते तेन धात्वादिस्थसंवृताकारादीनां कथं ग्रहणमिति विचार्य्यताम् ।

उत्तरम्—ननु तुल्यास्यसूत्रे आस्यपदोपादानेनास्यबहिर्भूतकालस्य तत्रत्यप्रय-त्नपदेनाग्रहणेऽकाराकारयोः कालभेदे सवर्णग्रहणेऽपि दण्डाढकमित्यादौ विवृतप्रयत्न-कस्याऽकारस्य संवृताकारेण ग्रहणं न स्यादिति चेन्न । अ अ इति सूत्रारम्भसामर्थ्यात् सूत्रकारेण वर्णसमाम्नायेऽकारस्य विवृतत्वेन प्रतिज्ञातत्वात् । न चातिखट्वेत्यादौ

आन्तरतम्यात् प्राप्तविवृताकारनिवृत्तये संवृताकारविधानेन अ अ इति चरितार्थमिति वाच्यम्। लोके वेदे च विवृताकारस्यासंभवात्। एवं शाम्यतीत्यादौ दीर्घसिद्धये वर्णसमाम्नायस्थाकारेण धात्वादिस्थाकारादीनां ग्रहणाय धात्वादिस्थस्यापि संवृतस्यैव पठितस्य कार्यार्थं विवृतत्वं प्रतिज्ञेयम्। न च प्रयोगे द्वयोराक्षरसमाम्नायिकयोर्युगपत् समवस्थानासंभवेन सवर्णदीर्घसूत्रे प्रत्याहारग्रहणेन भवत्याक्षरसमाम्नायिकेन धात्वादिस्थस्य ग्रहणमिति ज्ञापनेन धात्वादिषु विवृतत्वप्रतिज्ञानं व्यर्थमिति वाच्यम्। खट्वाढकमित्यादौ दीर्घार्थं प्रत्याहारग्रहणस्य साफल्येन ज्ञापनासंभवात्। तस्मात् अ अ इति सूत्रेण लाघवाच्छास्त्रे सर्वोऽप्यकारो विवृत इति सामान्यापेक्षज्ञापनमेवानुसरणीयमिति दिक्।

प्रश्नः—१२. **अनुवृत्तिनिर्देशे सवर्णग्रहणोपायं व्यवस्थापयत।**

उत्तरम्—ननु व्यक्तिपक्षे व्यक्तीनामानन्त्येन प्रत्याहारघटितेषु ककारादिचिह्नेन प्रत्याहारस्थोऽयमिति प्रत्यभिज्ञया तत्र तत्राणुदित्सूत्रप्रवृत्तावपि प्रत्याहारमद्वारीकृत्य लक्ष्यसंस्कारकबोधजनकनिर्देशे अस्य च्वावित्यादौ तदप्रवृत्त्या शालीभवतीत्याद्यसिद्धिरिति चेन्न। व्यञ्जकध्वनिभेदेन ह्रस्वाकारादिव्यक्तीनां भेदेऽपि स्फोटस्यैकत्वेन तद्रूपव्यक्तेरप्येकतयाऽणुदित्सूत्रप्रवृत्तिसुवचत्वात्। न चाकारादिव्यक्तेरेकत्वेऽनुबन्धादिसंकरः स्यादिति वाच्यम्। प्राग्दीव्यतोऽण्, शिवादिभ्योऽण् इत्यादौ पुनः पुनर्लिङ्गकरणेन, इह मुण्डो भव, इह जटिलो भव इतिवत् यदनुबन्धविशिष्टो यो विधीयते तदनुबन्धनिमित्तमेव कार्यं सम्पादयतीति स्वीकारेण चानुबन्धसंकराभावात्। सप्तदशसामिधेनीवदावृत्त्या द्वचच्त्वसम्पादनेन घटिक इत्यादौ द्वचच्त्वसिद्धेः, ऋषिसहस्रेषु सहस्रदक्षिणाव्यवहारबलेन गौण्यप्युत्तरा संख्या पूर्वां संख्यां बाधत इति स्वीकारेण किरिणेत्यादौ एकत्वसंख्याबाधात्, यदसम्भवि कार्यं तत्रानेको युगपत् करोति यच्च सम्भवं यथा दर्शनं स्पर्शनं तदनेकोऽपि युगपत्करोतीति युगपद्युच्चारणसम्भवाच्च व्यक्तेरेकत्वे क्षतिविरहात्।

ननु व्यक्तिस्फोटस्यैकत्वेऽपि ध्वनेरुदात्तत्वादिविरुद्धधर्माध्यासेन नानात्वमेव। न च शकुनिवद्दृष्टान्तेनैकत्वमकारस्येति वाच्यम्। व्यक्तिस्फोटवादिना व्यक्तेर्नित्यत्वैकत्वाभ्युपगमेन शब्दस्य शकुनिवत्त्वे कूटस्थत्वाभावेन शब्दानित्यत्वप्रसङ्गात्। तस्मात् भिन्ना एवाकाराः। अनेकद्रष्टृकानेकदेशोपलब्धिविषयकाऽऽदित्यदृष्टान्ते-

नैकद्रष्टृकानेकदेशोपलब्धिविषयस्य शब्दस्यैकत्वसाधनं न सम्भवति, उपाधिदोष-ग्रस्तत्वात्। न चाकाशस्यैकत्वाच्छब्दस्यैकत्वमिति वाच्यम्। औपाधिकभेदेन तस्यापि भिन्नत्वादिति नानात्वमेवाकारस्येति चेन्न। प्रत्याहारे आकृतिपक्षाश्रयणेनावर्णाकृतिरुपदिष्टा, स्वाश्रयेण सर्वस्यावर्णकुलस्य ग्रहणसिद्धत्वात्। अत एव तपरसूत्रं चरितार्थम्। सवर्णतकाराणां झल्त्वसिद्धिश्च। अथवा व्यक्तिपक्षेऽपि तदेवेदं कार्षापणमितिवद्रूपसामान्येनाभेदप्रतीत्या अस्य चत्वारित्यादौ न दोष इति दिक्।

प्रश्नः—१३. भाष्योक्त-लृकारोपदेशप्रयोजनं साधूपपादयत।

उत्तरम्—ननु लोके क्लृपिस्थलृकार एव प्रयुज्यते तस्य चासिद्धत्वादृकार-स्यैवाच्कार्येण प्राल्कारीयतीत्यादिसिद्ध्या पृथगनुबन्धकरणेनानुबन्धसंकराभावेन, पुषादिसूत्रे लृदित इति निर्देशेन लृकारस्येत्संज्ञोपपत्त्या च लृकारोपदेशो व्यर्थः, संज्ञादिषु न्याय्यस्य ऋतकशब्दस्य सत्त्वे लृतक इति नामकरणस्य कृदन्तं नाम कुर्यादिति स्मृतिविरोधात् यदृच्छाशब्दस्यासत्त्वाच्च, सुरापानकर्तुरनुकुर्वन् यः सुरां पिबेत्सोऽपि मन्ये पतितः स्यादितिवद् भग्नदन्तोच्चरितस्य लृतकस्यानुकरणेऽनुकार्य-दुष्टत्वेनानुकरणस्यापि दुष्टतया तत्र शास्त्राप्रवृत्तेः, गुरोरनृतो ह्रस्वस्येति न्यास-करणेन क्लृ३प्तशिखः होतृ३कार इत्यादौ प्लुतसिद्धेश्च, न यदृच्छाऽशक्तिजानुकरण-प्लुत्याद्यर्थमपि लृकारोपदेश इति चेन्न। यो हि ब्राह्मणं हन्ति तदनुकुर्वन् कदली-स्तम्भं छिन्द्यान्न स मन्ये पतितः स्यादित्यत्रानुकार्यदोषेणानुकरणस्यादुष्टत्ववदप-शब्दपदार्थकस्यापशब्दस्यापशब्दत्वाभावेनाशक्तिजानुकरणार्थं गुरुभूतन्यासेन लघु-रूपलृकारोपदेशप्रत्याख्यानस्यानुचितत्वेन प्लुताद्यर्थमपि लृकारोपदेशस्यावश्यक-त्वात्। न च प्रकृतिवदनुकरणमित्यतिदेशेनानुकरणेऽपशब्दत्वम्। अपशब्दस्योपदेशा-भावेनाप्रकृतित्वादिति दिक्।

प्रश्नः—१४. सन्ध्यक्षरेषु तपरोपदेशपक्षखण्डनमतपरोपदेशपक्षे प्राप्त-दोषवारणञ्च भाष्योक्तदिशा प्रतिपादयत।

उत्तरम्—ननु सन्ध्यक्षरेऽतपरोच्चारणेऽर्धैकारौकारयोरपि वर्णसमाम्नायस्थेन ग्रहणे तयोरच्त्वेन ह्रस्वसंज्ञायां ह्रस्वत्ववारणाय एच इग्घ्रस्वादेश इत्यस्यावश्य-कत्वेन गौरवमिति। तपरोच्चारणे तु तयोरसमकालतया वर्णसमाम्नायस्थेनाग्रहणे-

ऽनच्त्वाद्ध्रस्वत्वाभावेनान्तरतम्याद्ध्रस्वपदेन इक एव विधाने सूत्रं व्यर्थमिति विशेषेण सन्ध्यक्षरे तपरोच्चारणं कर्तव्यमिति चेन्न। समाहारैकारौकारस्याप्युपलभ्यमानत्वेन ह्रस्वादेशशासनेषु कदाचिदवर्णो मा भूदित्यैजर्थमतपरपक्षे एङर्थमिव सूत्रस्यावश्यकत्वेन विशेषाभावात्, गो३त्रात इत्यादौ द्वित्वाद्यसिद्धेः औ३पगव इत्यादौ प्लुतसंज्ञाऽसिद्धेश्च "ए ओङ्" "ऐ औच्" इति यथास्थितन्यासस्य सुवचत्वात्। यदि च भूयसा व्यपदेश इति सिद्धान्तेन समाहारवर्णयोरैचोश्चोत्तरभूयस्त्वेन इवर्णोवर्णाविव भविष्यत इति तपरपक्षे ऐजर्थमपि सूत्रं प्रत्याख्यायते तदाऽतपरपक्षेऽपि अर्धैकारौकारयोरसत्त्वेन एङः समानस्थानिकत्वेन इकारोकारावेव भविष्यत इति एङर्थमपि सूत्रं प्रत्याख्यायत इति लाघवादपरपक्ष एव श्रेयान्। नन्वतपरपक्षे खट्वेन्द्रः खट्वौदन इत्यादौ त्रिमात्रचतुर्मात्रस्थानिनां त्रिमात्रचतुर्मात्रादेशवारणाय "आद्गुणो दीर्घः" "वृद्धिरेचि दीर्घः" इति दीर्घग्रहणे गौरवम्, तद्दोषवारणाय यदि सवर्णदीर्घसूत्रे दीर्घ इति योगविभागेन पूर्वपरयोर्य एकादेशः स दीर्घं इति स्वीक्रियते तदा पशुं विद्धं पचन्तीत्यादौ दीर्घमेव पररूपं स्यात्। नच अमि पूर्वं इत्यत्र पूर्वग्रहणेन यथाजातीयकःपूर्वस्तथाजातीयक एवोभयोर्यथा स्यादिति ज्ञापनेन पशुमित्यत्र हल इति सूत्रारम्भात् सम्प्रसारणाच्चेति दीर्घपूर्वरूपं नेति ज्ञापनाद्विद्धमित्यत्र, अतो गुणे पर इतीयता सिद्धे रूपग्रहणेन परस्य यादृशं रूपं तादृशमेवोभयोर्यथा स्यादिति ज्ञापनेन पचन्तीत्यत्र दोषाभावेन दीर्घग्रहणस्यानावश्यकत्वमिति वाच्यम्। खट्वर्श्य इत्यादौ दीर्घ इति योगविभागादकारो नानान्तर्यादेकारो नेति विगृहीतस्य श्रवणवारणाय गुणवृद्धिसंज्ञाविधौ दीर्घग्रहणस्य कर्तव्यत्वेन गौरवादिति चेन्न। संज्ञाविधौ तन्त्रेण षष्ठीतत्पुरुषबहुव्रीहिपरकतपरकरणेन त्रिमात्रचतुर्मात्राणां गुणवृद्धिसंज्ञानुभावात् त्रिमात्रचतुर्मात्रादेशाप्राप्तेरिति दिक्।

प्रश्नः—१५. वर्णैकदेशानां वर्णग्रहणेन ग्रहणाग्रहणयोर्युक्तीरुपपाद्य तत्र तत्र दोषवारणपुरःसरं सिद्धान्तपक्षं समर्थयत।

उत्तरम्—तस्यादित इति सूत्रप्रमाणेन ऐचोश्चोत्तरभूयस्त्वादिति वार्तिकप्रमाणेन चाज्वर्णाः सांशाः। तत्र क्वचित्सजातीयसम्मेलनेन भेदाग्रहः क्वचिच्च विजातीयसम्मेलने भेदग्रहोऽपि यथेक्षु। तेषामंशेषु अत्वजात्यभिव्यञ्जककण्ठस्थानजन्यत्वादिविशिष्टमातृकत्वस्य सत्त्वेन समुदायस्यावयवस्यावयवसदृशवर्णग्रहणेन

ग्रहणं भवति । नन्वेवं सन्ध्यक्षरेषु समानाक्षराश्रयो विधिः प्राप्नोति स प्रतिषेध्य इति चेन्न । दीर्घात्पदान्ताद्वेत्येकयोगेन निर्वाहे पृथग्योगकरणेन दीर्घे ह्रस्वाश्रयो विधिर्नेति ज्ञापनात्, याता वातेत्यत्र तुगभावसिद्धेः, अतो भिस इति सूत्रे तपरकरणेन खट्वाभिरित्यादौ ऐस्भावसिद्धेश्च, गापोष्टगित्यत्र ककारानुबन्धेनाऽऽकारस्थस्याकारस्य लोपो नेति ज्ञापनेन याता वातेत्यादावकारलोपाप्राप्तेः, नौ द्व्यच इति सूत्रे नौग्रहणेन दीर्घाद्द्व्यज्लक्षणो विधिर्नेति ज्ञापनेन बाचा तरतीत्यादौ ठनोऽप्राप्तेश्च, तैलं न विक्रेतव्यमित्यादिनिषेधस्य व्यपवृक्तगोसर्षपादिविक्रयणेऽप्रवृत्तिवदपवृक्तस्याभिन्नबुद्धिविषयसमुदायस्य योऽवयवस्तस्मिन् पृथग्भूतवर्णविधिर्नेति ज्ञापनेन अग्ने इन्द्र इत्यादौ सवर्णदीर्घाप्राप्तेः, सन्ध्यक्षरस्य विवृततरत्वेन प्रयत्नभेदात्, व्यपवृक्तोऽपि ऐ औ इत्यादौ दोषाभावाद् ग्रहणपक्षे समानाक्षरविधिप्रतिषेधवचनस्यानावश्यकत्वात् । यदि च नरसिंहवत्समुदायावयवस्य वर्णान्तरत्वात्समुदाये न पृथगुपलब्धवर्णानां सत्त्वम् । सत्यपि गोसादृश्ये गवये गोत्वस्येव सन्ध्यक्षरेषु अत्वादिजातेरभावश्चेत्युच्यते, तदा न वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते । नचैवमानृधतुरित्यादौ द्विहल्त्वाभावान्नुण्न स्यादिति वाच्यम् । अश्नोतेश्चेत्यारम्भेणावर्णोपधस्य नुट् चेत्तर्हि अश्नोतेरेवेति नियमेनाऽऽटतुरित्यादौ दोषाभावे तस्मान्नुडिति सूत्रे द्विहल्ग्रहणाकरणेन तत्र नुट्सिद्धेः । कृपो रो ल इत्यस्य रेफावभासिस्फोटस्य लकारावभासिस्फोट इत्यर्थेन क्लृप्त इत्यत्र दोषाभावात्, क्षुभ्नादिषु तृप्नोतिशब्दपाठसामर्थ्येन ऋकारात्परस्य नस्य णो भवतीति ज्ञापनेन "ऋतः" नो णो भवति ततश्छन्दस्यवग्रहादिति योगविभागेन च मातृणामित्यादौ णत्वसिद्धेः । कुक्कुट इत्यादौ मात्राकालस्य गम्यमानत्वात्तुल्यरूपसंयोगस्यैकवर्णत्वाभावेन द्विव्यञ्जनाश्रयसंयोगसंज्ञोपपत्तेर्नाग्रहणपक्षेऽपि कश्चिद्दोष इति ।

वस्तुतस्तु—स्फुटप्रतिभासमानया व्यक्त्या जातेर्व्यञ्जनेन एङि अकारादेः स्फुटप्रतिभासाभावेन, ऐचि अवयवस्य स्फुटप्रतिभासेऽपि जातिव्यञ्जकस्थानप्रयत्नयोरसादृश्येन वर्णैकदेशानां वर्णग्रहणेनाग्रहणेऽपि ऋकारे रेफस्य स्फुटप्रातिभासतया रत्वजात्यभिव्यञ्जकस्थानप्रयत्नसाम्यतया च भवति ऋकारैकदेशरेफस्य स्वतन्त्ररेफग्रहणेन ग्रहणमिति दिक् ।

प्रश्नः—१६. रेफस्य यकारवकाराभ्यां पूर्वोपदेशः परोपदेशो वेति विविच्यताम् ।

उत्तरम्—ननु रेफस्य यकारवकाराभ्यां परोपदेशे स्वर्नयति, मद्र ह्रदः, कुण्डं रथेनेत्यादौ अनुनासिकद्विर्वचनपरसवर्णवारणाय तत्तद्विधिप्रतिषेधवचनारम्भे गौरवेण रेफस्य पूर्वोपदेश एव युक्तः। नच पूर्वोपदेशेऽपि देवित्वा, पचेरन्, जीरदानुरित्यादौ वैकल्पिककित्ववारणाय व्लोपसिद्धये च कित्वप्रतिषेधव्लोपवचनप्रयुक्तगौरवमेवेति वाच्यम्। रलो व्युपधादित्यत्रावकारान्ताद् व्युपधादव्युपधादित्यर्थक–रलोऽव्युपधादिति न्यासेन लोपो व्योर्वलीत्यत्र रोरीति लोपेन रेफस्यापि प्रश्लेषेणागौरवादिति चेन्न। बहुषु यण्घटितेषु रण्घटितत्वेन पाणिनीयसूत्रभेदकल्पनाया अन्याय्यत्वात्। नच परोपदेशे पूर्वोक्तदोषावसरः, रेफोष्मणां सवर्णा न सन्तीति सिद्धान्तात् व्याप्येन निमित्तेन रेफस्य कार्यित्वबाधाच्चेति दिक्।

प्रश्नः—१७. अयोगवाहविषये किं प्रतिपादितं भगवतेति स्फुटं ब्रूत।

उत्तरम्—ननु प्रयोगे श्रूयमाणानामयोगवाहानां वर्णसमाम्नाये पाठेन ग्रहणकशास्त्रबलेन चोपदेशाभावात् प्रत्याहारप्रतिबद्धकार्यं तेषां न प्राप्नोतीति चेन्न। 'उरँ केणेत्यादौ। अड्व्यवाय इति णत्वसिद्ध्यर्थमट्सु, 'सर्पिःषु' इत्यादौ षत्वसिद्धये शषु तेषामुपदेशोपसंख्यानावश्यकत्वात्। नच शर्षु तेषामुपदेशेऽनुस्वारस्य शर्त्वात्तद्व्यवधानेऽपि षत्वे सिद्धे विसर्जनीयग्रहणवन्नुम्ग्रहणमपि व्यर्थमिति वाच्यम्। पुंस्वित्यादौ षत्ववारणाय नुमो योऽनुस्वारस्तत्र यथा स्यादन्यत्र मा भूदिति ज्ञापनार्थं नुम्ग्रहणस्यावश्यकत्वात्। यत्तूब्जेरुपध्मानीयोपधत्वेनोब्जितेत्यादौ जश्त्वाय शर्षूपदेश इति तन्न। उब्जिजीषतीत्यादौ "नन्द्राः" इति निषेधसिद्धये उब्जेर्दकारोपधत्वात्। उब्जितेत्यादि तु भुजन्युब्जावित्यादिनिपातनात्सिद्धम्। न चैवमभ्युद्ग इत्यादावपि बत्वं स्यादिति वाच्यम्। अकुत्वविषय एव तन्निपातनात्; उपसर्गद्वयपूर्वकगम्धातोर्डप्रत्यये तत्सिद्धत्वाच्च। अथवा दकारोपधत्वेनोब्जक इत्यत्र प्लुतिप्रयोजकगुरुसंज्ञाप्रयोजकसंयोगसंज्ञायाः सिद्धत्वेऽपि निष्कृतमित्यादौ इदुदुपधस्य चाप्रत्ययस्येत्युत्तरस्य विसर्जनीयस्येत्यर्थेन षत्वसिद्धावपि निर्दिश्यमानपरिभाषया वृक्षस्तरतीत्यादावलोऽन्त्यविधिसिद्धावपि च उरँ केणेत्यादौ द्वित्वसिद्धये व्यूढोरस्केनेत्यादौ सकारे विसर्गवदट्त्वमाश्रित्य प्राप्तणत्ववारणायानल्विधाविति निषेधसिद्धये चाविशेषेणैव तेषामुपदेशः कर्तव्य इति दिक्।

प्रश्नः—१८. वर्णा अर्थवन्तोऽनर्थका वेति सयुक्तिकमुपपाद्यताम्।

उत्तरम्—एति, आभ्याम्, औपगवः अ अपेहीत्यादावेकवर्णानां धातुप्रातिपदिकप्रत्ययनिपातानामर्थवत्त्वात् कूप-सूपादौ ककारापचये सकारोपजनेऽर्थान्तरस्य यथास्थितेऽन्यार्थस्य गमनात् एकस्तिलतैलदानन्यायेन संघातस्यैवार्थवत्त्वदर्शनाच्च कूपसूपादौ ककारघटितस्यान्योऽर्थः ककाराभावेऽन्योऽर्थो यस्मात्तस्मात् कूपे कूपार्थकत्वं ककारस्य, सूपे सूपार्थकत्वं सकारस्येति स्वीकाराच्च वर्णा अर्थवन्त इति। न चैवं धनं वनमित्यादौ प्रतिवर्णं प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तौ पदत्वेन नलोपाद्यापत्तिरिति वाच्यम् प्रातिपदिकार्थपञ्चकमध्ये संख्यायाः सङ्ख्यार्थतया तस्यैकार्थ्यादेकाज्द्विर्वचनन्यायेन प्रतिवर्णं सुबुत्पत्तेरयोगात् प्रतिवर्णमर्थानुपलब्धेः, सिंहो हतः घ्नन्तीत्यादौ वर्णव्यत्ययायोपजनविकारेषु अर्थव्यत्ययाद्यनुपलम्भात्, कूपघटकवर्णविपर्ययस्य सूपे दर्शनेऽपि कूपार्थादर्शनाच्च वर्णा अनर्थकाः। अवयवस्यानर्थकत्वेऽपि रथाङ्गवत्समुदायार्थवत्त्वसम्भवेन सर्वमदातम्। एवञ्च स्वभावेन वर्णेषु द्वैविध्यदर्शनेऽपि यत्रान्वयव्यतिरेकाभ्यां वर्णेऽर्थवत्त्वसम्भवो यथा धातुप्रातिपदिकादौ तत्र वर्णा अर्थवन्तो यत्र तथा न यथा कूपादौ तत्रानर्थका इति सारांश इति दिक्।

प्रश्नः—१९. **किमर्थमन्तःस्थानामणसूपदेश इति शङ्कां समादधत।**

उत्तरम्—नन्वणुदित्सूत्रेऽन्तःस्थानां बोधनायाण्शब्दोच्चारणं व्यर्थमजुदिदित्येवेष्टसिद्धेरिति चेन्न। सय्ँ य्ँ यन्तेत्यादौ पक्षे त्रियकाररूपसिद्ध्यर्थं तेषामणसूपदेशावश्यकत्वात्। अन्यथा द्वित्वे परसवर्णत्वं सिद्धं वक्तव्यमिति सिद्धान्तादुक्तप्रयोगे परसवर्णे कृते तद्विशिष्टस्य यत्वाभावाद् द्विर्वचनं न स्यात्। द्विर्वचने कृतेऽपि हलो यमामिति लोपेन द्वियकारमेव रूपमिति न भ्रमितव्यम्। झरो झरीत्यत्रावश्यमनुवर्तनीयस्यान्यतरस्यां ग्रहणस्य मध्यस्थतयाऽत्रापि तदनुवृत्तेरावश्यकत्वात्। ननु माऽस्तु झरो झरीत्यपि विभाषालोपः, न च लोपस्य नित्यत्वे चतुर्ष्वित्यादौ द्वित्वेऽपि षकारलोपे इष्टसिद्धौ शरोऽचीति व्यर्थमिति वाच्यम्, नित्येऽपि लोपे प्रत्तमित्यादौ लोपस्य चरितार्थत्वेनाचो रहाभ्यामित्यस्य लोपापवादतया चतुर्ष्वित्यादौ द्वित्ववारणाय तस्यावश्यकत्वादिति चेन्न। लण् सूत्रे विभाषालोप इति भाष्याणणकारेण प्रत्याहाराश्रयणाच्चोभयत्र विभाषासम्बन्धस्यावश्यकत्वादिति दिक्।

प्रश्नः—२०. **अक्षरशब्दस्य कः पदार्थ इति निरुच्य वर्णज्ञानं वाग्विषय इत्यादिश्लोकवार्तिकं व्याख्यायताम्।**

उत्तरम्—अक्षरसमाम्नायेत्यादावक्षरपदं नञ्पूर्वकविनाशार्थकस्य क्षिदः, क्षरतेर्वा हरचि नित्यार्थपरम्। स्फोटस्य नित्यतया भवत्यस्याक्षरत्वम्। ध्वनाव-क्षरपदव्यवहारस्तु स्फोटाभिव्यञ्जकतयैव। अथवा व्याप्त्यर्थकाश्नोतेः सरनि कृतेऽक्षरशब्दस्य व्यापकत्वमर्थः। नानादेशेषु युगपदेकस्यैव शब्दस्याभिव्यक्तिदर्श-नेन स्फोटस्य व्यापकत्वात्। अथवा वर्णस्याक्षरमिति पूर्वाचार्याणां संज्ञा। वर्णा अक्षराणीति वचनात्। एवञ्चाक्षरसमाम्नायेत्यस्य श्रुतिरूपो वर्णसङ्घात इत्यर्थ इति नित्यत्वं व्यापकत्वं वर्णत्वञ्चाक्षरशब्दार्थ इति फलितम्।

ननु वर्णानां साधुत्वाप्रतिपादनात्किमर्थमक्षरसमाम्नायोपदेश इति चेदत्राह—वर्णज्ञानमित्यादि। अस्यार्थः—वर्णाः ज्ञायन्ते अनेनेति वर्णज्ञानमक्षरसमाम्नाया-त्मकं शास्त्रं वाग्विषयीयत आरभ्यतेऽनेनेति वाग्विषयो वाक्समाम्नायो वाक्संग्रहोपाय इति यावत्। तथा च वर्णसमाम्नायात्मकं शास्त्रं वेदादिसकलवचोविषयः, यत्र वर्णसमाम्नाये ब्रह्म वेदः बोध्यतया ब्रह्म वा वर्तते तदर्थं शास्त्रप्रवृत्त्यर्थमिष्टसिद्ध्यर्थं लघ्वर्थञ्चोपदिश्यत इति। तथा चाक्षरसमाम्नायाध्ययनतन्मूलव्याकरणाध्ययनाभ्यां पुष्पितः, तदर्थभावनाजनिततत्त्वज्ञानेन फलितः, चन्द्रतारकवदयं ब्रह्मराशिर्वाक्-समाम्नायो वेदितव्यो बोध्यबोधकयोरभेदात्। तेन सर्ववेदाध्ययनजनितपुण्यफला-वाप्तिश्चास्य ज्ञाने भवति। तादृशपुत्रवत्त्वेनास्य विज्ञातुः पितरौ स्वर्गे लोके च महीयेते इति दिक्।

अथ तृतीयाह्निकम्

प्रश्नः—२१. वृद्धिसंज्ञासूत्रे तद्भाविताऽतद्भावितपक्षयोः कतरः श्रेया-निति विविच्य संज्ञाधिकारप्रयोजनं प्रत्याख्याय संज्ञासंज्ञिनोः सन्देहः परिहरणीयः।

उत्तरम्—ननु वृद्धिपदे तन्त्राद्यङ्गीकारे वृद्धिशब्देन विहिता ये आदैचस्ते वृद्धिसंज्ञका इत्येवं तद्भावितपक्षस्य वृद्धिशब्दैकत्वेऽतद्भावितपक्षस्य च सम्भवेऽपि तद्भावितपक्षे शालीयः, आम्रमयम्, आम्रगुप्तायनिरित्यादौ तद्भावितत्वाभावेन वृद्धिलक्षण-छमयट्फिञ्प्रत्ययानामप्राप्तेः, मालादीनाञ्चेति ज्ञापनेन तत्साधने तन्त्राद्याश्रयणे च गौरवादतद्भावितपक्ष एव श्रेयान्। नचैतत्पक्षेऽपि सर्वभासस्ता-

वद्भावं इत्यादौ पूर्वपदान्तोदात्तत्वप्राप्तिपुंवद्भावप्रतिषेधदोषोऽस्त्येवेति वाच्यम् उत्तरपदवृद्धौ सर्वञ्चेत्यत्रोत्तरपदस्योत्तरपदाधिकारपरत्वेन वृद्धिनिमित्तस्येत्यत्र निमित्तपदोपादानात्कृत्स्नाया वृद्धेर्निमित्तमित्यङ्गीकारेण च दोषाभावादिति ।

ननु वृद्धिरादैजित्यतः प्राक् संज्ञासंज्ञिसम्प्रत्यय "अथ संज्ञा" इति संज्ञाधिकारः कर्तव्यः । क्रियमाणेऽपि संज्ञाधिकारे का संज्ञा कः संज्ञीति सन्देहनिवृत्तये परोच्चारिता संज्ञा, अनाकृतिः संज्ञा, इत्थं लिङ्गा संज्ञेत्येवं वचनञ्च कर्तव्यमिति चेन्न, देवदत्तः स्पयो पूय इतिवदाचार्योपचारात् प्रत्यायकस्य संज्ञात्वं प्रत्याय्यस्य संज्ञित्वमित्येवमस्य संज्ञाबोधकत्वं वृद्धिशब्दस्य च संज्ञित्वमिति निर्णयात् । किञ्च नानेन साधुत्वं क्रियते साधुत्वमस्या अन्यथा कृतत्वात् । प्रयोगनियमस्य वक्ष्यमाणत्वेन वृद्धिशब्दात् परे आदैचः प्रयोक्तव्या इति प्रयोगनियमार्थमपि नेदम् षष्ठ्यदर्शनेन आगमालेखावपि न, समानाधिकरण्यदर्शनेन विशेष्यविशेषणभावोऽपि न, प्रतीतपदार्थकयोरेव लोके तद्दर्शनात् । किन्तु समानविभक्तिकतया संज्ञासंज्ञिनोरेवात्र निश्चयसम्भवः । दोषत्वात् खल्वपि संज्ञाधिकारः । तस्य परमात्रेऽङितमित्यादावसम्बद्धवद्व्यवायेनाधिकारासम्भवात् । देवदत्त इति संज्ञावदनाकृतिः संज्ञा आकृतिमन्त संज्ञिन इत्यस्य न्यायतो लाभेनानाकृतिरिति वचनस्यान्यथासिद्धत्वात् । लघ्वर्थं हि संज्ञाकरणमिति सिद्धान्तेन यल्लघु सा संज्ञा यद्गुरु सः संज्ञीति लाभात् सतो हि कार्यिणः कार्येण भवितव्यमिति सिद्धान्तेन पूर्वोच्चारिता संज्ञा, परोच्चारितः संज्ञीति स्वीकारेण परोच्चारितेति वचनानावश्यकत्वात् गौरवेणापाणिनीयत्वेनेत्थं लिङ्गेति वचनाकरणादपि संज्ञासंज्ञिनोरसन्देहसिद्धिरिति संज्ञाधिकारः प्रत्याख्यातो भगवता पूर्वोक्तवार्त्तिकद्वयस्य न्यायप्रतिपाद्यतया सिद्धान्तात्वेनाङ्गीकृतमिति दिक् ।

प्रश्नः—२२. वृद्धिरादैजित्यस्य समुदितसंज्ञां निराकृत्य तपरकरणप्रयोजनप्रदर्शनपूर्वकमन्योन्याश्रयदोषं परिहरत ।

उत्तरम्—ननु शतदंडनन्यायेन समुदाये वाक्यपरिसमाप्त्या समुदितसंज्ञावारणाय वृद्धिगुणसंज्ञयोः प्रत्येकं ग्रहणं कर्तव्यमिति चेन्न । देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामित्यत्र प्रत्येकमित्यनुक्तेऽपि भुजिक्रियायाः प्रत्येकं परिसमाप्तिवदिहापि प्रत्येकमित्यनुक्तेऽपि न्यायात् लक्ष्ये पृथगादैचां दर्शनात् मालादोनाञ्चेति लिङ्गात्प्रत्येक वृद्धिगुणसंज्ञासम्भवात् ।

नन्वेकस्यैव द्रव्यस्य शीतोष्णगुणभेदेन भेददर्शनादुदात्तस्थानेऽनुदात्तप्रयोगे दोषदर्शनाच्च गुणानां भेदकत्वेन वृद्धिरादैजित्यत्राकारेणोदात्तानुदात्तस्वरितानां तत्कालानां सवर्णानां तपरसूत्रबलेन ग्रहणाय तपरकरणमिति चेन्न । उदात्तगुण-कानङ्गीकारेणेनेष्टसिद्धेः अस्थिदधीति सूत्रे उदात्तग्रहणेन देवदत्तो जट्यपि मुण्ड्य स्वामाख्यां न जहातीति दर्शनेन च यत्नं विना स्वरूपोच्चारितगुणानामभेदकत्वस्यैव न्याय्यत्वात् । न चाप्यसन्देहार्थं तपरकरणम् । औतोऽम्शसोरितिवद् व्याख्यानेन सन्देहनिवृत्तिसम्भवात् । नन्वेवं तपरकरणं व्यर्थमिति चेदुच्यते—खट्वेन्द्र इत्यादौ त्रिमात्रचतुर्मात्रस्थानिनां त्रिमात्रचतुर्मात्रादेशवारणाय तपरकरणस्यावश्यकत्वात् । कृते च तपरे तन्त्रेण तत्पुरुषबहुव्रीह्याश्रयणेन तपरसूत्रबलादुभयत्र द्विमात्रस्यैव संज्ञाविधानम् । ऋदोरबित्यत्र तु मुखसुखार्थो दकारो न तकार इति न दोष इति ।

सतामादैचां संज्ञा संज्ञया चादैचो भाव्यन्त इत्येवमन्योन्याश्रयस्तु न, शब्दस्य नित्यत्वात् । मृजेर्वृद्धिरित्यादिशास्त्रन्तु मृजेरकिङत्सु प्रत्ययेषु मृजि प्रसङ्गे मार्जिः साधुरिति बोधनपरमिति दिक् ।

प्रश्नः—२३. इको गुणवृद्धीति सूत्रे इग्ग्रहणप्रयोजनं साधूपपादयत ।

उत्तरम्—ननु इको गुणवृद्धीति सूत्रे गुणवृद्धीत्यस्य न धातुलोप इति सूत्रे निषेध्यसमर्पणायावश्यकत्वेऽपि इग्ग्रहणं व्यर्थमेव । आतोऽनुपसर्गे क इति सूत्रस्थ-कित्त्वस्य तुन्दशोकयोरित्युत्तरार्थमावश्यकत्वेऽपि सामग इत्यत्राकारस्य गुणेऽपि पररूपेणेष्टसिद्धौ गापोष्टगिति कित्करणेन नाकारस्य गुणो भवतीति ज्ञापनेन यातः वातेत्यादावाकारस्य गुणाप्राप्तया उपदेशसामर्थ्याद् ग्लायतीत्यादौ सन्ध्यक्षरस्य गुणाप्राप्तया सप्तम्यां जनेर्ड इत्यत्र डित्करणेन व्यञ्जनस्य गुणो न भवतीति ज्ञापनेन मन्दुरज इत्यादौ नकारस्य गुणाप्राप्तया च नारसन्ध्यक्षरव्यञ्जननिवृत्यर्थमपीग्ग्रहण-मिति चेन्न । व्यञ्जनस्याकार एव गुण इति नियमाभावेन नग इत्यादौ आन्तर-तम्यान्मकारस्य ओकारगुणवारणाय अन्येष्वपि दृश्यत इत्यत्राऽकारानुवृत्तेरावश्यक-तया ज्ञापनासम्भवेन व्यञ्जननिवृत्यर्थमिग्ग्रहणस्यावश्यकत्वादिति दिक् ।

प्रश्नः—२४. इको गुणवृद्धीत्यत्र तच्छेषपक्षस्तदपवादो वेति पक्ष द्वयं दूषयित्वा सिद्धान्तपक्षं समर्थयत ।

उत्तरम्—सार्वधातुकेति सूत्रे इको गुणालोऽन्त्यपरिभाषयोरुपस्थित्याऽविरोधेनेक्रूपान्त्यस्य गुणोऽन्त्यस्येको वा गुण इत्युभयोर्विशेष्यविशेषणभावेनोपस्थितिरूपतच्छेषः, आहोस्विदङ्गस्येत्यत्रेगपेक्षयावयवषष्ठीस्वीकारेण नियमस्यानुपस्थानरूपस्तदपवादः। नाद्यः, मिदिमृजिपुगन्तलघूपधर्च्छिदृशक्षिप्रक्षुद्रेषु इक्रूपान्त्यस्यालोऽभावेन अङ्गाङ्गिभावापन्नयोरुभयोरनुपस्थित्या सर्वादेशगणप्रसङ्गात्। नान्त्यः जुसि सार्वधातुकार्धधातुकह्रस्वाद्योर्गुणेषु अन्त्यस्यानुपस्थित्याऽनन्त्यापि गुणप्रसङ्गात्। यद्यपि सार्वधातुकेति गुणे सिद्धे यत्पुगन्तेति गुण आरभ्यते तेन सार्वधातुकार्धधातुकयोरेव पुगन्तलघूपधस्य, पुगन्तलघूपधस्यैव सार्वधातुकार्धधातुकयोरिति लक्ष्यानुरोधेनानन्तरस्येति न्यायमनादृत्य द्विविधनियमाश्रयणेन सम्भवति दोषवारणं तथापि अनेनिजुरित्यादौ जुसि चेति गुणापत्तिस्तदवस्थैव। तस्मान्नाय तच्छेषो नापि तदपवादः किन्तु यत्र विधेयसमर्पके गुणवृद्धिपदे श्रूयेते तत्र इक इति षष्ठ्यन्तं पदमुपतिष्ठत इति पदोपस्थितिपक्ष एव। एवञ्च यत्र सामानाधिकरण्येनान्वयसम्भवो यथा सार्वधातुकादौ तत्र सामानाधिकरण्येन अलोऽन्त्यस्येत्यनेनान्त्यस्यादेशव्यवस्था यत्र तथा न यथा मिदादौ तत्र वैयधिकरण्येनान्वये निमित्ताभावादलोऽन्त्यस्येति परिभाषानुपस्थितिरेवेति दिक्।

प्रश्नः—२५. इको गुणवृद्धीति सूत्रे तच्छेषपक्षे दूषणोद्धारः सम्भवति न वेति विविच्यताम्।

उत्तरम्—मिदः इः मिदिः तस्य मिदेः, पुकि अन्तः पुगन्तः लघ्वी उपधा लघूपधेति कर्मधारयो न तु बहुव्रीहिः पुगन्तश्च लघूपधा च पुगन्तलघूपधम्, तस्य पुगन्तलघूपधस्य, ऋच्छति ऋ ॠ ॠतामिति "ऋच्छत्यॄतामि"ति प्रश्लिष्टनिर्देश इत्येवं स्थानिनिर्देशेन "उरङि गुणः" उः अङि गुणो भवति ततो "दृशेः" दृशेश्चाङि गुणो भवति उरित्येवेति नियमेन, "स्थूलादीनां यणादिपरं लुप्यते" इत्येको योगस्ततः "पूर्वस्य च गुणः" इत्यपरः क्षिप्रक्षुद्रयोर्यण आदिपकारो दकारश्च तस्माद्यणादेः परं लुप्यते तस्मादेव च यणादेः पूर्वस्य गुण इति क्षेपिष्ठः क्षोदिष्ठ इत्यनयोः सिद्धत्वेन च तत्र तत्र इक्परिभाषानुपस्थितावपि दोषाऽभावः। क्नोः क्नित्करणाज्ज्ञापकादनिग्लक्षणत्वेऽपि लघूपधगुणस्य प्रतिषेधो

भविष्यतीति इग्लक्षणगुणनिषेधसिद्धिश्च यद्यपि तच्छेषपक्षे सम्भवति तथापि मृज्यंशे दोषस्यादुर्धरत्वेन योगविभागस्य गुरुभूतत्वेन च तच्छेषपक्षो न श्रेयानिति दिक् ।

प्रश्नः--२६. इको गुणवृद्धीति सूत्रे वृद्धिग्रहणप्रयोजनमुपपाद्यताम् ।

उत्तरम्--ननु गुणविधौ सर्वत्र स्थानिनिर्देशाभावेन तदर्थं गुणग्रहणस्यावश्यकत्वेऽपि वृद्धिविधौ पुनः सर्वत्र स्थानिनिर्देशेन वृद्धिग्रहणं व्यर्थम् । मृजेर्वृद्धिरचस्ततोऽचि क्ङिति तत्र पूर्वयोगेन सिद्धे उत्तरयोगो क्ङित्यजादावेवेति नियमार्थस्ततो वेति योगविभागत्रयकरणेन मृष्ट इत्यादौ दोषवारणेन क्ङिति चेति सूत्रे उत्तरार्थं मृजेर्वृद्धिरिको यथा स्यादनिको माभूदित्येतदर्थश्च वृद्धिग्रहणम् । न चाभत्सीदित्यादौ व्यञ्जनस्य वृद्धिवारणाय इग्लक्षणावृद्धिरास्थेयेति वाच्यम् । हलन्तलक्षणया वृद्धया बाधात् । नेटीति निषेधस्तु बाध्यविशेषचिन्तया अष्टावसरन्यायेन बाध्यसामान्यचिन्तया वा सिचिवृद्धेरप्यभावप्रतिपादकस्तेनाकोषीदित्येतदर्थमपि न वृद्धिग्रहणम्, इति चेन्न । न्यनुवीदित्यादौ क्ङिति चेति वृद्धिप्रतिषेधार्थं सिचि वृद्धिरित्यत्रैतदुपस्थितये वृद्धिग्रहणस्यावश्यकत्वात् । न चान्तरङ्गत्वादुवङादेशेऽनन्त्यत्वाद्वृद्धेरप्राप्तिरिति वाच्यम् । ह्म्यन्तेति सूत्रे अविभक्योर्नेति विमानापेक्षया णिश्चिग्रहणेन न सिच्यन्तरङ्गमस्तीति ज्ञापनात् । अन्यथाऽन्तरङ्गत्वात् गुणायादेशयान्तत्वादेव सिद्धे तद्व्यर्थं स्यात् । किञ्चाकोषीदित्यादावन्तरङ्गत्वाद्गुणे कृतेऽलघुत्वादेव वृद्धयभावसिद्धेऽतो हलादेरिति सूत्रेऽद्ग्रहणेन न सिच्यन्तरङ्गमिति ज्ञाप्यते, तेनोवङं बाधित्वान्यनुवीदित्यादौ प्राप्तवृद्धिनिषेधाय इग्लक्षणा सिचिवृद्धिरास्थेया । वस्तुतस्तु बाध्यसामान्यचिन्तया सकलान्तरङ्गबाध इति ज्ञापकानुशरणमेकदेशयुक्तित्वानुसारेणेति दिक् ।

अथ चतुर्थाह्निकम्

प्रश्नः--२७. न धातुलोप इति सूत्रे आर्धधातुक इति लोपविशेषणं गुणवृद्धिविशेषणं वेति विविच्य यङ्यक्यवलोपे प्रतिषेध इति वार्तिकं भाष्योक्तदिशा प्रत्याख्यायताम् ।

उत्तरम्--ननु न धातुलोप इति सूत्रे आर्धधातुक इत्यस्य लोपविशेषणत्वेन आर्धधातुके निमित्ते लोपे सति ये गुणवृद्धी प्राप्नुतस्ते न भवत इत्यर्थो, गुणवृद्धि-विशेषणत्वेन वा लोपे सति आर्धधातुके निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवत इत्यर्थो वेति चेदुच्यते--लोपविशेषणेऽपि उपेद्ध इत्यादौ आर्धधातुकनिमित्ते लोपे सत्यपि अन्तरङ्गप्रतिषेधदृष्ट्या बहिरङ्गगुणासिद्धत्वात् गुणवृद्धिविशेषणे च क्नोपयतीत्यादौ गुणस्य णिज्रूपार्धधातुकनिमित्तकत्वेऽपि चेले क्नोपेरिति निपातेन निषेधाप्रवृत्तेः पक्षद्वयस्य निर्दुष्टत्वेऽपि गुणवृद्धिविशेषणपक्षे लवितेत्याद्यर्थं धातुग्रहणकरणरूपगौरवेण लाघवाल्लोपविशेषणपक्ष एव ज्यायान् ।

ननु नुम्लोपस्त्रिव्यनुबन्धलोपेऽप्रतिषेधार्थं यङ्यक्क्यबलोपेऽप्रतिषेध इति परिगणनं कर्तव्यमिति चेन्न । नुम्लोपे अभाजि राग इत्यादौ वृद्धेरिग्लक्षणत्वा-भावेन निषेधाविषयत्वात्, आर्धधातुक इत्यस्य लोपविशेषणत्वेन लविता आस्र-माणमित्यादौ लोपस्यार्धधातुकनिमित्तकत्वाभावेन परिगणनस्य व्यर्थत्वात् । न च निषेधस्येग्लक्षणगुणवृद्धिविषयत्वे आर्धधातुकेत्यस्य लोपविशेषणत्वे च स्यदः प्रश्रथः हिमश्रथः जोरदानुरित्यादौ निषेधो न प्राप्नोतीति वाच्यम् । स्यदादिषु निपात-नात् याधातोरकि सम्प्रसारणे च तत्सिद्धत्वाच्चादोषात् । उपबर्हणमिति तु बृहधातो रूपं बृहेरिति परिगणनं व्यर्थम् । न चैवं भेद्यत इत्यत्रापि निषेधः स्यादिति वाच्यम् । धातोर्लोपो यस्मिन्निति बहुव्रीहौ प्रत्यासत्त्या समाननिमित्त-कत्वस्य गुणवृद्ध्योराश्रितत्वादिति दिक् ।

प्रश्नः--२८. न धातुलोप इत्यस्यावश्यकता न वेति विचारणीयम् ।

उत्तरम्--बेभिदिता, मरीमृजकः, कुकुभिता, समिधितेत्यादावल्लोपस्य स्थानिवत्त्वात् यङोऽचि चेत्यनेन व्यञ्जनमात्रस्यैव लोपस्वीकारेण लोलुवः मरी-मृजः सरीसृप इत्यादावप्यल्लोपस्य स्थानिवत्त्वात् गुणाप्राप्त्या सूत्रमिदं व्यर्थम् । न च व्यञ्जनमात्रस्य तेन लोपविधानेऽनवकाशत्वादन्तरङ्गानपीति न्यायाच्च लुकि कृतेऽल्लोपो न स्यादिति वाच्यम् । लुग्लोपयोर्भिन्नविषयत्वेन लुकः सावका-शत्वात्, यस्य हल इत्यत्र "यस्ये"ति "हल" इति च योगो विभज्यते, आद्ये अतो लोप इत्यनुवर्त्य यस्य च लोपो भवति अत इत्येवेत्यतो लोपस्य लुको

बाधकत्वेन व्यञ्जने लुकः सावकाशत्वाच्चेष्टसिद्धेः । नोनाव इत्यादौ तु यङोऽचि चेत्यनेन लुकोऽनिमित्तकत्वेनादावेव लुकः प्रवृत्त्या लोपो न लुकं बाधत इति न स्थानिवत्त्वेन गुणाप्रवृत्तेरवसरः । स्यदः, प्रश्रथः, हिमश्रथ इत्यादीनां "स्यदो जवे" "अवोदैधौद्मप्रश्रथहिमश्रथाः" इति निपातेन, जीरदानुरित्यस्य ज्याधातोरकि सम्प्रसारणेन, निकुचितमित्यस्य सन्निपातपरिभाषया सिद्धत्वात् सकलेष्टसिद्धेः सूत्रमिदं व्यर्थमिति दिक् ।

प्रश्न—२९. क्ङिति चेति सूत्रे तन्निमित्तग्रहणप्रयोजनमभिधाय भाष्योक्ततत्प्रत्याख्यानप्रकारः प्रदर्शनीयः ।

उत्तरम्—ननु क्ङिति चेति सूत्रस्य परसप्तम्या क्ङिदव्यवहितपूर्वस्येको गुणो नेत्यर्थे चितमित्यादावेव निषेधः स्यान्नतु भिन्नमित्यादाविति तदर्थं रोरवीत्यत्र प्रत्ययलक्षणेन यङो ङित्त्वमादाय गुणनिषेधप्रतिषेधार्थश्चात्र सूत्रे तन्निमित्तग्रहणं कर्तव्यम् । नच प्रत्ययस्याङ्गांशे उत्थिताकाङ्क्षत्वेन तस्य तत्रैवान्वयौचित्येन भिन्न इत्यादौ न दोष इति वाच्यम् । भिनत्तीत्याद्यर्थं पुकि अन्तः पुगन्तः, लघ्वी उपधा लघूपधा, पुगन्तश्च लघूपधा च तस्य पुगन्तलघूपधस्येत्यर्थस्यावश्यकत्वेनाङ्गविशेषणत्वे मानाभावात् । नच तन्निमित्तग्रहणेऽपि रियति प्रादुद्रुवदित्यादौ गुणापत्तिरिति वाच्यम् । अन्तरङ्गत्वादियङुवङोः कृतयोरनुपधात्वेन तदप्राप्तेरिति चेन्न । धातोर्विहिते क्ङित्यनन्तरो यो धातुर्विकरणो वा तस्य गुणो नेत्यर्थात्, कार्यकालपक्षे विधिनिषेधयोरेकवाक्यतायां पुगन्तलघूपधस्य गुणो भवति क्ङितिनेत्यर्थात्, इको झल् हलन्ताच्चेति कित्त्वविधानेन क्नोः कित्करणेन च भवत्युपधालक्षणस्य गुणस्य निषेध इति ज्ञापनाच्च, भिन्न इत्यादौ रोरवीतीत्यत्र च न लुमतेति प्रत्ययलक्षणनिषेधेन ङित्परत्वाभावात्, यङ्लुकश्छान्दसत्वात्, पूर्वयोगे रोरवीति फलकार्धधातुकग्रहणस्यानावश्यकत्वादन्तरङ्गपरिभाषया बहिरङ्गगुणस्यासिद्धत्वाच्च दोषाभावेन तन्निमित्तग्रहणस्यानावश्यकत्वादिति दिक् ।

प्रश्नः—३०. हलोऽनन्तरा इति सूत्रे नञः अन्तरशब्देन समासः अन्तराशब्देन वेति विविच्य व्यवहितस्य संयोगसंज्ञावारणोपायं प्रतिपादयत ।

उत्तरम्—अत्र सूत्रे अविद्यमानमन्तरं विवरं वर्णशून्यकाल एषामित्यन्तर-शब्दस्य नञा समासे अप्स्वित्यप्सु इत्यवग्रहेऽर्धमात्राकालव्यवायेन संयोगसंज्ञा न स्यादतोऽविद्यमाना अन्तरा एषां मध्ये वर्णा अविद्यमाना येषामित्यन्तरा शब्दस्य नञा समासः। अथान्तरा शब्देन समासेऽपि गुरोरनृत इति सूत्रे दूराद्धूत इत्यस्य सम्बन्धेनाप्स्विति सप्तम्यन्ते सम्बोधनत्वाभावेन प्लुताप्रवृत्त्या प्रयोजनाभावेन दोषाभावेन च संज्ञाप्रवृत्तेरयोगान्न कश्चिद्दोष इति।

ननु अनन्तराविमौ ग्रामावित्यादौ व्यवहितेऽपि अनन्तरशब्दप्रयोगदर्शनेन पनसमित्यादौ व्यवहितेऽपि सकारमकारयोः संयोगसंज्ञायां स्कोरिति सलोपः स्यात्। नच व्यवहितेऽपि चेत्संयोगसंज्ञा तदाऽनन्तरग्रहणं व्यर्थं स्यादिति वाच्यम्। इयेष इत्यादावेकस्य संयोगसंज्ञावारणाय तस्य साफल्यादिति चेन्न। विजातीय-स्यैव लोके व्यवधायकत्वेन सारण्यकससीमकसस्थण्डलिकार्थकग्रामशब्दस्य बह्वर्थकतया नदीपर्वतादीनामपि तदन्तर्गतत्वेन तेषां विजातीयत्वाभावेन तथा प्रयोगेऽपि प्रकृतेऽचो विजातीयतया व्यवधायकत्वेन संज्ञावृत्तेरयोगादिति दिक्।

प्रश्नः—३१. एकैकस्य संयोगसंज्ञा कथं वार्यते? कश्च तत्र दोष इत्य-भिधाय सहग्रहणं प्रत्याख्यायताम्।

उत्तरम्—प्रत्येकं वाक्यसमाप्तिदर्शनेन वृद्धिसंज्ञावत्प्रत्येकं संयोगसंज्ञायामपि संयोगावादी यस्य तस्य संयोगादेरिति वान्यस्य संयोगादेरित्यर्थकरणेन निर्यायादि स्यादावेत्वस्य, संयोगावन्तौ यस्य पदस्येति संयोगान्तस्य लोप इत्यस्यार्थकरणेन दृषत्करोतीत्यादौ संयोगान्तलोपस्य, संयोगयोरादीतयोरिति स्कोः संयोगाद्योरि-त्यस्यार्थकरणेन शक्तेत्यादौ संयोगादिलोपस्य, एवमेव संयोगादेरात इत्यस्यार्थ-करणेन निर्यात इत्यादौ नत्वस्य परिहारसम्भवेन प्रत्येकं संयोगसंज्ञायामपि दोषाभावेन सह सुपेतिवत्संयोगसंज्ञायां सहग्रहणं न कर्तव्यम्। नन्वेवं प्रत्येकं संयोग-संज्ञेति पक्षः स्वीकरणीय इति चेदुच्यते—संयुज्यन्ते वर्णा यत्रेति महासंज्ञाकरणेन लक्ष्यानुरोधात् समुदाये वाक्यपरिसमाप्तिरिति न्यायाश्रयणेन च प्रत्येकं संयोगसंज्ञाऽप्राप्तो नार्थः सहग्रहणेन, प्रत्येकं संयोगसंज्ञापक्षाश्रयणेन चेति दिक्।

प्रश्नः—३२. बहूनां समवाये द्वयोर्द्वयोः संयोगसंज्ञा बहूनामेव वेत्यत्र कः पन्था भवद्भ्यो रोचते?

उत्तरम्—ननु यत्र बहूनां समवायस्तत्राविद्यमानमन्तरं येषामिति विग्रहे एकाज्द्विर्वचनन्यायेन बहूनामेव संयोगसंज्ञायामपि अनुषङ्गलोपार्थमवश्यवक्तव्येन अन्त्यात्पूर्वो मस्जेर्मिदिति वचनेन सनजाना समवायेन संयोगादिलोपसिद्धेः। अङ्गेन संयोगादेर्विशेषितत्वेन निर्लेयात् सस्वर्पते सस्वरिषष्टत्यादौ वान्यस्य संयोगादेरित्येत्वस्य गुणोर्त्तीति गुणस्य ऋतश्च संयोगादेरितीटा, पदस्य संयोगान्तस्येत्यर्थे द्रषत्करोतीत्यत्र संयोगान्तलोपस्य, धातोः संयोगादेरित्यर्थे निर्ग्लान इत्यादौ संयोगादेरात इति नत्वस्य च सिद्धेर्न कश्चिद्दोष इति चेदुच्यते। संज्ञायाः कार्यार्थत्वेन बहूनां संज्ञायां कार्याभावात् तत्तत्सूत्रेषु अङ्गपदधातुषु तत्तदवयवस्य संयोगस्याश्रयणे गौरवात् अविद्यमाना अन्तरा येषामिति विग्रहे मध्ये य आधेयः स द्वयोरेव मध्ये भवतीति संयोगवद्विप्रयोगस्यापि विशेषावगतिहेतुत्वेन न भवतीत्यपि द्वयोरेवेति बहूनां समवायेऽपि द्वयोरेव संयोगसंज्ञायाः समुचितत्वात्। नचैवमिन्दिद्रीयिषतीत्यत्र नन्द्राः संयोगादय इति निषेधात् दकारस्य द्वित्वं न स्यादिति वाच्यम्। निषेधस्याजाश्रयत्वेन दकारस्याचः परत्वाभावान्निषेधाप्रवृत्तेरिति दिक्।

प्रश्नः—३३. मुखनासिकावचनोऽनुनासिक इति सूत्रं भाष्योक्तदिशा व्याख्याय प्रासादवासिन्यायेन सूत्रमेव कुतो न प्रत्याख्यातं कथञ्चान्योन्याश्रयदोषः परिहृत इति व्यवस्थापयत।

उत्तरम्—मुखञ्च नासिका च मुखनासिकं मुखनासिकं वचनमस्य सोऽयं मुखनासिकावचनः। निपातनाद्दीर्घत्वम्। ईषद्वचनमावचनं मुखनासिकमावचनमस्य सोऽयं मुखनासिकावचन इति वा। किञ्चिन्मुखवचनं किञ्चिन्नासिकावचनमिति तदर्थः। मुखोपसंहिता वा नासिका वचनमस्य मुखद्वितीया वा नासिका वचनमस्य सोऽयं मुखनासिकावचनः स्थानान्तरमिति यावत्। मुखग्रहणेऽक्रियमाणे यमानुस्वाराणामेव प्रसज्येत। नासिकाग्रहणं कचटतपानामेव प्राप्तानुनासिकसंज्ञानिवृत्त्यर्थम्।

अत्र प्रथमचतुर्थपक्षस्थसमासमाश्रित्य मुखग्रहणं प्रासादवासिन्यायेन प्रत्याख्यातम्। द्वितीय-तृतीयपक्षे प्रत्याख्यानन्तु नोपयुज्यते। समग्रस्थानिकत्वोभय-

स्थानिकत्वाभावात् । अतएव तयोर्दुष्टत्वम् । सूत्रन्तु न प्रत्याख्यातम् प्रासादवासिन्यायस्य क्रियाशब्देष्वेव प्रवृत्तेः । अनुनासिकशब्दो हि रूढिशब्द एव । यमानुस्वाराणां संज्ञाप्राप्तावपि नैव दोषो न प्रयोजनम् । इतरेतराश्रयन्तु न नित्यशब्दत्वात् । शास्त्रमपि न व्यर्थं छन्दस्यचि परत आङोऽननुनासिकप्रसङ्गेऽनुनासिकः साधुरिति सर्वत्राननुनासिकबुद्धिनिवर्तनेन सार्थक्यादिति दिक् ।

प्रश्नः—३४. तुल्यास्य-प्रयत्नपदार्थं निरूप्य समासत्रयप्रदर्शनं किमर्थं तेषु सिद्धान्तिनो निर्भरत्वन्न वेति च निरूप्यताम् ।

उत्तरम्— अत्र सूत्रे पक्षचतुष्टयं सम्भवति, तेषु अस्यन्त्यनेन वर्णानिति करणे ण्यति अनमास्यम् आस्यन्दते द्रवीकरोति इति वा आङ्पूर्वकात् स्यन्दतेर्डप्रत्यये आस्यपदं पक्षे योगरूढम् । प्रयतनं प्रयत्नः भावे नङ् यत्नमात्रमिति तदर्थः । आस्यपदञ्च प्रयत्नविशेषणार्थमिति तुल्यमास्यप्रयत्नमस्येति द्वन्द्वगर्भबहुव्रीहिः प्रथमः पक्षः । नन्वस्मिन्पक्षे प्रयत्नस्यास्येनाविशेषणान्मुखप्रयत्नयोः तुल्यत्वात् जबगडदानां भिन्नस्थानिनां सवर्णसंज्ञायाम् ऊर्ग्जं इत्यादौ झरो झरीति लोपप्रसङ्गः स्यात् । न चास्ये तुल्यदेशप्रयत्नामिति न्यासान्तरकरणेन देशपदोपादानात् भिन्नस्थानिनां प्रयत्नविशेषणार्थमास्यपदोपादानेन विचारादिबाह्यप्रयत्नानां च व्यावृत्तिरवर्णस्य सर्वमुखस्थानत्वेन तस्य सङ्ग्रहोऽपीति वाच्यम् । न्यासान्तरस्यापाणिनीयत्वादिति चेदेवं तर्हि आस्ये भवमास्यं शरीरावयवाद्यत् इति तद्धितान्तमास्य, प्रारम्भो यतनस्य प्रयत्नः, स एव द्वन्द्वपक्षश्च । अवर्णस्यङाश्च पांसूदकवत् भागविवेकाभावादवर्णस्यैचोश्च विवृततरत्वेन प्रयत्नभेदात् एङचोश्च यावत्स्थानसाम्याभावादुदात्तादीनामभेदवत्त्वेन तेषां संग्रहान्न क्वापि दोषः । यत्तु प्रयतनमेव प्रयत्नस्तदेव च तद्धितान्तमास्यम् । सवर्णसंज्ञायाश्च भेदाधिष्ठानतया बाह्यप्रयत्नभेदेऽपि स्पृष्टतादिसमानवत् किञ्चित्समानमिति कृत्वा स्पृष्टतादिभेदेऽपि विवारादिसाम्यमादाय नोदात्तादिषु दोष इति । तन्न । तथा सति सकारच्छकारयोः षकारठकारयोः सकारथकारयोरपि किञ्चित्समानमिति कृत्वा सवर्णसंज्ञापत्तेः । यद्यपि तुल्यः आस्ये प्रयत्न एषामिति बहुव्रीहिः, आस्ये प्रयत्नः आस्यप्रयत्नः तुल्यः आस्यप्रयत्न एषामिति परस्तत्पुरुषस्ततो बहुव्रीहिः, तुल्यः आस्ये तुल्यास्यः तुल्यास्यः प्रयत्न एषामिति पूर्वस्तत्पुरुषस्ततो बहुव्रीहिर्वति

समासत्रयेनोक्तापत्तिस्तथापि आद्ययोः स्थाने तुल्यत्वलाभायास्यपदसामर्थ्यकल्पने गौरवात्त्रिपदे सप्तम्यन्तस्य पूर्वनिपातापत्तेरन्ते च मयूरव्यंसकादित्वकल्पने गौरवात् उत्तरपदार्थप्रधानत्यागस्य सिद्धान्तविरुद्धत्वाच्च नात्र सिद्धान्तिनो निर्भरत्वमिति दिक् ।

प्रश्नः—३५. ऋऌवर्णयोः सवर्णसंज्ञाविषये भाष्यकृता किं सिद्धान्तितमिति स्फुटं प्रतिपादयत ।

उत्तरम्—होतॄकार इत्यादौ ऋकारऌकारयोः स्थानभेदेन सवर्णसंज्ञा न स्यादिति ऋऌवर्णयोः सवर्णसंज्ञा वक्तव्या । न चापूर्वमात्राविधानार्थं "ऋति ऋ वा" "ऌति ऌ वे"ति वचनं कृतमेव । तत्र वाशब्दः समुच्चयार्थः ऋतीत्यपनीय ऋत इति पाठ्यं पूर्वश्च सवर्ण इत्यनुवर्तनीयम् उत्तरत्र च ऋत इत्यनुवर्तनीयं सवर्ण इति च निवर्तनीयम् । तथा च ऋतः पूर्वपरयोः स्थाने ऌ दीर्घश्चादेश इत्यर्थे ऌकारस्य दीर्घाभावेनान्तरतम्याद्दीर्घऋकार एव भविष्यतीति होतॄकार इति सिद्धिः, दध्य्ऌकार इत्यत्रातिव्याप्तिश्च नेति सवर्णसंज्ञावचनं व्यर्थमिति वाच्यम् । होतॄ३कार इत्यादौ प्लुतसिद्ध्यर्थमण्सु पाठेन तयोरच्त्वमवश्यं वाच्यम् । तथा च दीर्घविधानेनैव रेफवत्ताऽन्तर्येण रेफद्वयगर्भस्य विवृतसाम्येन दीर्घऋकारस्यैवं ऌकारवत्तान्तर्येण ऌकारद्वयगर्भस्य विवृतसाम्येन दीर्घस्य च सिद्ध्या वार्तिकद्वयस्य प्रत्याख्यातत्वात् । खट्वऌकार इत्यत्र ऋत्यक इति प्रकृतिभावार्थमुप । ऌकारीयतीत्यादौ वा सुप्यापिशलेरितिवृद्ध्यर्थञ्च सवर्णसंज्ञावचनस्यावश्यकत्वाच्च । न चैवम् ऌकारस्य रपरत्वापत्तिरिति वाच्यम् । उरण् रपर इत्यत्र लपरत्वस्यापि विधानेन तदापत्तेरयोगात् । न च ऋवर्णान्नस्येति वार्तिकेन क्लृप्यमानमित्यत्रापि णत्वप्रसङ्ग इति वाच्यम् । वर्णैकदेशा वर्णग्रहणेन गृह्यन्त इति पक्षे ऌकारैकदेशलकारमादाय चुटुतुलशर्व्यवायेनेति निषेधात् । एवञ्च ऋकारैकदेशरेफमादाय मातॄणामिति सिद्धे ऋवर्णान्नेति वार्तिकमपि न कार्यमिति दिक् ।

प्रश्नः—३६. शकारशकारयोः सवर्णसंज्ञानिषेधप्राप्तौ युक्तिं प्रतिपाद्य तयोः सवर्णसंज्ञानिषेधो निराक्रियताम् । अपर आह इति व्याख्यायां पूर्वतः को विशेष इति चाभिधीयताम् ।

उत्तरम्—नन्विकारः सवर्णग्रहणेन शकारमपि गृह्णाति इत्येवं शकारस्याच्त्वम् । हल्षु चोपदेशाद्धल्त्वम् । अनेन निषेधात्कथमच्त्वमिति तु नाशङ्कनीयम् । एतद्वाक्यार्थबोधोत्तरमन्यत्र निषेधेऽपि स्ववाक्यार्थबोधात् प्राक् स्वघटकपदार्थोपस्थितिवेलायां स्वात्मनि स्वव्यापाराभावेन निषेधाज्ञानात् । तथा च शकारशकारयोरज्झल्त्वेन सवर्णसंज्ञानिषेधे परश्शतानीत्यत्र झरो झरीति लोपो न स्यादिति चेन्न । विवृतं स्वराणामित्यत्र ईषदित्यनुवर्त्य ईषद्विवृतमुष्मणां विवृतं स्वराणामिति पञ्चधा प्रयत्नस्वीकारेण प्रयत्नभेदेन शकारस्यानच्त्वात् । इत्यञ्च प्रयत्नभेदेनाज्झलोः सवर्णसंज्ञाऽप्राप्तौ नाज्झलाविति व्यर्थमिति भाष्याशयः । किञ्च सूत्रसत्वेऽपि वाक्यापरिसमाप्तिन्यायेनैव न चेकारः शकारं गृह्णाति । एतद्वाक्यार्थबोधात्प्राग् ग्रहणकशास्त्रस्यानिष्पत्तेः । अपर आहेत्यादिनाऽनच्त्वमेव वाक्यापरिसमाप्त्या साध्यते नतु प्रयत्नभेदेन । अत्र पक्षे इकारेण शकारस्य सवर्णसंज्ञा भवतु मा वा भवत्विति वाक्यशेषाध्याहारेण प्रतिज्ञाविकल्पार्थो वाशब्दः स्थितः । न च सत्यां सवर्णसंज्ञायां द्वित्वशास्त्रस्य वैकल्पिकत्वेन परश्शतानीत्यत्र कदाचित्त्रिशकारमपि रूपं स्यादिति वाच्यम् । असत्यामपि सवर्णसंज्ञायां द्वित्वलोपयोर्वैकल्पिकत्वेन सत्यामपि सवर्णसंज्ञारूपे विशेषाभावादिति दिक् ।

अथ पञ्चमाह्निकम्

प्रश्नः—३७. ईदूदेद्द्विवचनमिति सूत्रे तपरकरणं किमर्थमित्यभिधाय प्लुतानां प्रगृह्यसंज्ञा कथं सिद्ध्यतोति प्रतिपादयत ।

उत्तरम्—व्यक्तिपक्षे भेदकाश्च गुणा इति पक्षे च तत्कालानामुदात्तानुदात्तस्वरितानां ग्रहणायात्र सूत्रे तपरकरणम् । जातिपक्षे गुणा अभेदका इति पक्षे च तपरकरणमसन्देहार्थम् । व्यक्तिपक्षे तपरपदे पञ्चमीसमासेन ऊदेदंशे तपरपदस्यासन्देहार्थपरत्वाभ्युपगमेनैकरूप्यार्थं तथैवेदंशेऽपि समुचितम् । ह्रस्वेषु न दोषः प्रयत्नाधिक्यात् प्लुतानान्तु इष्यत एव ।

ननु व्यक्तिपक्षे क्रियमाणे च तपरे तपरसूत्रबलात् अतत्कालानां प्लुतान ?

प्रगृह्यसंज्ञा न स्यादिति चेन्न । एतद्दृष्ट्या प्लुतानामसिद्धत्वेनैव तत्कालत्वात् । नन्वग्नी इतीत्यत्राप्लुतवदित्यनेन प्लुतकार्ये प्रतिषिद्धे प्रगृह्याश्रयप्रकृतिभावसिद्ध्यर्थं प्लुतस्य प्रगृह्यसंज्ञाविधानस्यावश्यकत्वेन तत्सामर्थ्यात्सिद्धः प्लुतः स्वरसन्धिषु इति ज्ञापनेन दोषस्तदवस्थ एवेति चेन्न । प्लुतः प्रगृह्येत्यस्य प्लुतभाव प्रकृत्येत्यर्थकरणेनाग्नी इतीत्यत्र दोषाभावेन ज्ञापनासम्भावात्प्लुतानामसिद्धत्वेन तत्कालत्वेन प्लुतानां सङ्ग्रहात् । न चाणोऽप्रगृह्ये त्येकवाक्यतापन्नगृह्यसंज्ञादृष्ट्या प्लुतस्य सिद्धत्वेनाग्नी इतीत्यत्रानुनासिकप्रतिषेधो न स्यादिति वाच्यम् । यथोद्देशपक्षाश्रयणेनादोषात् इति दिक् ।

प्रश्नः— ३८. ईदूदेद्द्विवचनमिति सूत्रे कत्यर्थाः भाष्ये प्रदर्शितास्तेषु कः पक्षः सिद्धान्तसिद्ध इति प्रतिपाद्य द्वितीयस्य मध्यमत्वं कथं संगच्छत इति च प्रतिपाद्यताम् ।

उत्तरम्— ईदादयो यदि संज्ञिनस्तद्विशेषणञ्च द्विवचनं तदा ईदादयो यद्द्विवचनमित्यर्थः । अथ द्विवचन संज्ञि तद्विशेषणमिदादयस्तदा तदन्तविधिना ईदाद्यन्तं यद्द्विवचनमित्यर्थः । प्रत्ययग्रहणपरिभाषया द्विवचनेन तदन्तविधौ ईदादिविशेषणकतदन्तविधौ च इदाद्यन्तं यद्द्विवचनान्तमित्यर्थः । यदीदादिभिर्द्विवचनं विशेष्यीकृत्य समुदायेन तदन्तविधिस्तदा इदाद्यन्त यद्द्विवचनं तदन्तं प्रगृह्यसञ्ज्ञमित्यर्थः । आद्ये पचेते इतीत्यत्रैकारस्य द्विवचनत्वाभावेन प्रगृह्यसंज्ञा न स्यात्, वचनन्तु खट्वे इतीत्यादौ चरितार्थम् । तृतीये कुमार्यगारमित्यादौ प्रत्ययलक्षणेन द्विवचनान्ततया प्रगृह्यसंज्ञापत्तिः स्यात् । ईदूतौ च सप्तम्यर्थे इति सूत्रेऽर्थग्रहणेन प्रत्ययलक्षणेन प्रगृह्यसंज्ञा नेति ज्ञापने तु गौरवम् । चतुर्थे अशुक्ले वस्त्रे शुक्ले सम्पद्येतामिति शुक्ल्यास्तां वस्त्रे इत्यत्र शीशब्द ईकारान्तं द्विवचनं तदन्तत्वञ्च समुदायस्य भवति प्रत्ययलक्षणेनेति प्रगृह्यसंज्ञापत्तिः । संज्ञाविधाविति तदन्तविधिनिषेधेन तादृशार्थस्यासम्भवत्वमपि । तस्मात् द्वितीयपक्ष एव श्रेयान् । न चास्मिन्पक्षेऽपि माले इतीत्यादौ एकारान्तस्य द्विवचनत्वाभावेन प्रगृह्यसंज्ञा न स्यादिति वाच्यम् । अन्तवद्भावेन द्विवचनत्वोपपत्तेः । तृतीयचतुर्थपक्षयोः प्रत्ययांशे तदन्तविधिसत्त्वेन साम्यादभेदमारोप्य द्वितीयस्य भाष्ये मध्यमत्वोक्तिरिति दिक् ।

प्रश्नः—३९. अदसोमादिति प्रगृह्यसंज्ञादृष्ट्या मुत्वमीत्वयोरसिद्धत्वं कुतो नेति स्फुटमभिदधत।

उत्तरम्—ननु अमू अत्र अमी अत्रेत्यादौ मुत्वमीत्वयोरसिद्धत्वेन स्थानिलक्षणमयादिकार्यं कथं न। संज्ञाविधानन्तु अनुनासिकपर्युदासेन चरितार्थमिति चेन्न। तावन्मात्रप्रयोजने "अणोऽप्रगृह्यस्यानुनासिकोऽदसो ने"त्येकयोगेनैव सिद्धे पृथग्योगकरणेन प्रगृह्यसंज्ञादृष्ट्या मुत्वेत्वयोरसिद्धत्वन्नेति ज्ञापनात्। किञ्च कार्यकालपक्षे प्लुतः प्रगृह्य त्येकवाक्यतापन्नस्यादसो मादित्यस्यायादिभ्यः परत्वेनायादीन् बाधित्वा परत्वात्प्रगृह्यसंज्ञासिद्धेः। न च प्लुत्येकवाक्यतापन्नप्रगृह्यसंज्ञादृष्ट्याऽपि मुत्वेत्वयोरसिद्धत्वेन विप्रतिषेधासङ्गतिः "सतो हि विप्रतिषेध" इति सिद्धान्तादिति वाच्यम्। प्रगृह्यसंज्ञायां मुत्वेत्वयोः कार्यित्वेनाश्रयणात् रोरुत्ववदाश्रयासिद्धत्वस्यानुचितत्वेन विप्रतिषेधसम्भवात्। अथवा "अदसः" इत्येको योगः अदस ईदादयः प्रगृह्यसंज्ञास्ततो "मात्" माच्चपरे ईदादयः प्रगृह्यसंज्ञाः। एको यत्र मुत्वं सिद्धं तदर्थोऽपरो यत्र मुत्वमसिद्धं तदर्थः। पूर्वत्र एदिति निवृत्तं तेनामुकेऽत्रेत्यत्र न दोषः। यद्वैकयोगेऽपि मार्थादीदाद्यर्थानामित्यर्थेन, अदसः ईत्वोत्वे स्वरे बहिष्पदलक्षणे सिद्धे वक्तव्ये प्रगृह्यसंज्ञायाञ्चेति वचनेन च न कश्चिद्दोष इति। अत्रोक्तेषु समाधानेषु वचनसामर्थ्याद्विति समाधानमेव वरमन्यसमाधानेषु गौरवादिति दिक्।

प्रश्नः—४०. वर्णग्रहणे जातिग्रहणमित्यत्र मानमुपन्यस्यताम्।

उत्तरम्—नन्वज्ग्रहणसामर्थ्यादजेव यो निपात इति निपातेनाज्विशेषणात्प्रेदं ब्रह्मेत्यादौ प्रगृह्यसंज्ञावारणसम्भवे तदर्थमेकश्चासौ अजिति एकाजिति तत्पुरुषलाभार्थंनिपात एकाजनाङिति सूत्रे एकग्रहणं व्यर्थम्। न च निपातस्य विशेष्यतयाऽजन्तनिपात इत्यर्थेन मुख्याजन्तपरिग्रहायैवाज्ग्रहणस्य साफल्येन नाज्ग्रहणस्य सामर्थ्यमिति वाच्यम्। अनाङिति पर्युदासेन मुख्याजन्तस्य ग्रहणमिति बोधनासम्भवेन तेनाचो विशेष्यत्वस्य बोधनौचित्यादिति चेन्न। अन्यत्र वर्णग्रहणे जातिग्रहणमिति ज्ञापनेनैकग्रहणस्य साफल्यात्। तेन धिप्सतीत्यादौ भकारेण व्यवधानेऽपि हलन्ताच्चेति सनः कित्वेन नलोपसिद्धिः। अ इ उ अपेहीति समुदायस्य संज्ञावारणायैकग्रहणं स्वांशे चरितार्थमपीति दिक्।

प्रश्नः—४१. आहो इतीत्यादौ ऊँ आदेशः कथं नेति शङ्कां समाधाय "उञः" "ऊँ" इति योगविभागफलञ्चोद्भाव्य अर्थाश्रय एतदेव शब्दाश्रये च वृद्धयात्वे इति भाष्यं सोपष्टम्भं व्याख्यायताम् ।

उत्तरम्—नन्वाहो इतीत्यत्र निपातसमुदायस्य सत्त्वादेकादेशस्य परादिवद्भावेन ऊँ आदेशः कथं न । न च ओदित्यारम्भसामर्थ्यान्निपात एकादेश उञ्ग्रहणेन गृह्यत इति ज्ञापनेन नोक्तदोष इति वाच्यम् । आ उ ओ इत्यत्र अनाङिति प्रतिषिद्धे प्रगृह्यसंज्ञाविधानाय तस्य साफल्यात् । जान्वस्य रुजतीत्यत्र मय इति वत्वभावापत्त्या ज्ञापनस्य दुष्टत्वाच्चेति चेन्न । आहो इति समुदायस्य कन्निपातत्वात्, सानुबन्धकस्यैव उञो ग्रहणेन निरनुबन्धकस्य तस्याग्रहणाच्च ।

ननु प्रगृह्यत्वादेशयोः शाकल्यमते एव विधानेन द्वयोरेकप्रयोग एव प्रवृत्त्या ऊँ इति विति च रूपद्वयसिद्धौ "उञः ऊँ" इति योगविभागः किमर्थ इति चेन्न । 'उञ ऊँ' इत्येकयोगेऽनुवृत्तं प्रगृह्यपदम् उञ इति च श्रुतत्वाद्यदि आदेशेन सम्बध्यते तदा उञः इतौ परे प्रगृह्यत्वविशिष्टो दीर्घोऽनुनासिक ऊँ आदेश इत्यर्थे ऊँ इति आदेशाभावे निपात इति प्रगृह्यत्वे उ इतीति रूपद्वयसिद्धेऽपि वितीति न सिद्ध्येदिति तदर्थम्, यदि प्रगृह्यपदस्य साक्षादुद्देश्यसम्बन्धस्य क्लृप्तत्वेन विधेयविशेषणत्वाभावेन उञ इतौ परे प्रगृह्यसंज्ञा ऊँ आदेशश्च विधीयते तदाऽपवादविषये निपात इत्यस्याप्रवृत्तौ उ इतीति न सिद्ध्येदिति तदर्थश्च योगविभागाश्रयणात् ।

ननु लक्षणप्रतिपदोक्तपरिभाषयाऽनदः अदः अभवदित्यदोऽभवदिति च्व्यन्तस्य 'ओदि'ति प्रगृह्यत्ववारणेन "ओतश्च्विप्रतिषेध" इत्यस्यानावश्यकत्वेऽपि अगौः गौः सम्पद्यत इति गोऽभवदित्यत्र प्रगृह्यसंज्ञावारणाय तस्यावश्यकत्वमिति चेन्न । गौणमुख्यन्यायेनैव तद्वारणसम्भवे वार्तिकस्य निष्प्रयोजनत्वात् । नन्वेतन्न्यायाश्रयणे गौर्वाहीकस्तिष्ठतीत्यत्र वृद्धयात्वे न स्त इत्यत आह— अर्थाश्रय एतदेवमित्यादि । अर्थाश्रय इत्यस्यार्थवत्त्वयोग्यपदाश्रय इत्यर्थः । शब्दाश्रय इत्यस्य च मुख्यव्यपदेशरहितस्वार्थबोधकप्रातिपदिकाश्रय इत्यर्थस्तथा च पदकार्येष्वयं न्यायो न प्रातिपदिककार्ये इत्युक्तं भवति । वृद्धयात्वे च प्रातिपदिकाश्रय इति भाष्यतात्पर्यमिति दिक् ।

प्रश्नः—४२.'ईदूतौ च सप्तम्यर्थे'' इति सूत्रे अर्थग्रहणस्य प्रयोजन-मभिधीयताम् ।

उत्तरम्—ननु वचनसामर्थ्यात्संज्ञाविधाविति निषेधाप्रवृत्त्या सप्तम्याः प्रत्ययत्वेन प्रत्ययग्रहणपरिभाषया तदन्तविधौ ईदूदन्तं यत्सप्तम्यन्तमित्यर्थेन सोमो गौरी अधिश्रित इत्यादि सिद्धेऽर्थग्रहणं व्यर्थम् । न च लुकं बाधित्वा सुपां सुलुगित्यनेन सवर्णे दीर्घे परादिवद्भावेन सप्तमीत्वात् सूत्रस्य चारितार्थ्येन संज्ञाविधाविति तदन्तविधिनिषेधः स्यादेवेति वाच्यम् । परत्वादन्तरङ्गत्वाच्च पूर्वसवर्णं दीर्घं बाधित्वा आडामोरेव प्रसङ्गात् । न च सरसी शयानमित्यत्र सरः-शब्दान्ङी तस्य "इयाडियाजीकाराणामुपसंख्यानमितीकारे सूत्र चरितार्थमिति वाच्यम् । दक्षिणा पथेऽहि महान्ति सरांसि सरस्य इत्यादिप्रयोगदर्शनेन ङीषन्त-सरसीशब्दान्ङो लुकि तत्सिद्धेः । न च कुमार्यगारमित्याद्यर्थं प्रगृह्यसंज्ञायां प्रत्ययलक्षण न भवतीति ज्ञापनार्थमेवार्थग्रहणमस्त्विति वाच्यम् । संज्ञाविधौ तदन्तविधिनिषेधेन ईदूदेद्द्विवचनमित्यस्य ईदूदेदन्तं द्विवचनान्तं प्रगृह्यमित्यर्था-सम्भवेन प्रगृह्यसंज्ञाप्राप्त्यभावादिति चेन्न, सप्तम्यर्थमात्रबोधकत्व एवेदूदेदन्तस्य संज्ञा यथास्यान्न तदधिकार्थबोधकत्व इति ज्ञापनेन तस्य साफल्यात् । तेन वाप्यश्व इत्यत्र जहत्स्वार्थायां पूर्वोत्तरयोरानर्थक्यात् । अजहत्स्वार्थायाञ्च समासात्पांसूदकवत्संसृष्टस्यैव ज्ञानविषयतया सप्तम्यर्थमात्राबोधकत्वान्न पूर्वपदस्य प्रत्ययलक्षणेन प्रगृह्यसञ्ज्ञेति दिक् ।

प्रश्नः—४३. घुसंज्ञायां प्रकृतिग्रहणस्य प्रयोजनं तत्प्रत्याख्यानञ्चा-भिधाय तत्पक्षे धेडंशे कथं घुसंज्ञा सिद्धयतीति स्फुटं ब्रूत ।

उत्तरम्—ननु प्र णिदयते प्रणिद्यति प्रणिधयतीत्यादावाशतीत्यात्वे प्रतिषिद्धेऽ-नात्वभूतत्वादात्वभूतयोर्दाधाशब्दयोर्विधीयमाना घुसंज्ञा दोदेङ्धेटां न स्यादित शिदर्थं प्रणिदाता प्रणिधातेत्यादौ लक्षणप्रतिपदोक्तपरिभाषया लाक्षणिकात्व-भूतानां घुसंज्ञा न स्यादिति विकृतार्थञ्च दाधाघुसंज्ञा भवन्ति एषां प्रकृतयश्च घुसंज्ञा भवन्तीत्येवं घुसंज्ञायां प्रकृतिग्रहणं कर्तव्यम् । न च इदूतौ च सप्तम्यर्थे इति अर्थग्रहणमनुवर्त्य दाधामर्थे ये वर्तन्ते ते घुसंज्ञा इति प्रकृतीनामपि सिद्धय-त्येवेति वाच्यम् । ददातिसमानार्थकरातिरासतीत्यावपि घुत्वप्रसङ्गादिति चेन्न ।

प्रणिमयते इत्येतदर्थं नेर्गदेति सूत्रे प्रकृतिग्रहणस्यावश्यकत्वेन तां घुमामध्ये पठित्वा उभाभ्यामभिसम्भत्स्यन्त इति प्रणिमयते प्रणिदयत इत्युभयत्रापि णत्वसिद्धया शिदर्थं प्रकृतिग्रहणस्यानावश्यकत्वात् । प्रनिमीनाति प्रनिमिनोतीत्यादीनां "मीनातिमिनोती"त्यात्वेन माप्रकृतित्वेऽपि आकारान्तस्य ङितो माप्रकृतेर्ग्रहणेन प्रनिमातेत्यत्रैव न णत्वप्रसक्तिः, विकृतार्थमपि प्रकृतिग्रहणं न कर्तव्यम् । गामादाग्रहणेष्वविशेष इत्यनेन लक्षणप्रतिपदोक्तपरिभाषाबाधात् । द इत्येव धेटो निवृत्यर्थं सद्धेटो घुसंज्ञां ज्ञापयति तेन धेडंशेऽपि घुसंज्ञा सिद्धयति । इति दिक् ।

प्रश्नः—४४. समानशब्दप्रतिषेध इति वचनं प्रत्याख्याय उपादास्तेत्यत्र घुसंज्ञा कथं नेति विविच्यताम् ।

उत्तरम्—प्रनिदारयति प्रनिधारयतीत्यादौ प्रादीनां दार्धानिरूपितोपसर्गत्वेऽपि दाधानिरूपितोपसर्गत्वाभावादेव णत्वाप्रसक्तेः, दार्धारोरेवार्थवत्त्वेन तदवयवयोरनर्थकतयाऽर्थवद्ग्रहणपरिभाषया तयोर्घुत्वाप्राप्तेर्वा न समानशब्दप्रतिषेध इतिवचनं कर्तव्यम् न चेवं प्रणिदापयतीत्यादावपि दाब्घटकदाशब्दस्यानर्थकत्वेन घुत्वाप्राप्त्या णत्वं न स्यादिति वाच्यम् । यदागमपरिभाषयाऽऽगमविशिष्टस्य ग्रहणेन घुत्वसिद्धेः । प्रनिदारयतीत्यादौ तु न तथा रेफस्य दाशब्दमुद्दिश्य विहितत्वाभावात् । न च शब्दस्यानपायोपजनविकारितया नित्यत्वेनागमविधानं नोपयुज्यत इति वाच्यम् । आदेशवदनागमकबुद्धौ सागमकबुद्धिरिति बुद्धिविपरिणामेनागमव्यवहारस्य निर्बाधात् ।

ननु उपादास्तेत्यत्र मीनातिमिनोतीत्यात्वे दारूपत्वादर्थवत्त्वाच्च प्राप्तघुत्ववारणाय "दीङः प्रतिषेधः स्थाघ्वोरित्वे" इति वचनं कर्तव्यमिति चेन्न । अकित्वसन्निपातेन जायमानस्यात्वस्य घुसंज्ञायामनिमित्तत्वात् । घुत्वे हि "स्थाघ्वोरिच्चेति कित्वेनाऽकित्वस्य विघातः स्यादिति दिक् ।

प्रश्नः—४५. आद्यन्तवदेकस्मिन्नित्यस्य व्यपदेशिवदेकस्मिन्नित्यनेन गतार्थत्वं न वेति विविच्यताम् । सूत्रस्य प्रयोजनञ्च प्रदर्श्यताम् ।

उत्तरम्—ननु अपूर्वलक्षण आदिरनुत्तरलक्षणोऽन्त इत्येकस्मिन्नपि आद्यन्त-

व्यवहारस्य सुवचत्वेनाभ्यामित्यादिसिद्धे सूत्रं किमर्थमिति चेन्न । अवयववाचकयोराद्यन्तयोरवयविनि नित्यसाकाङ्क्षतया सत्यन्यस्मिन्यस्मात्पूर्वं नास्ति परमस्ति स आदिः, सत्यन्यस्मिन्यस्मात्परं नास्ति पूर्वमस्ति सोऽन्त इत्यसहाये तयोरप्रवृत्त्या सूत्रस्यावश्यकत्वात् । ननु यथा बहुषु पुत्रेषु अयमेव ज्येष्ठोऽयं मे मध्यमोऽयं मे कनिष्ठ इतिवदेकस्मिन्नपि ज्येष्ठादिव्यवहारो यथा चासूतायामसोष्यमाणायां भवति प्रथमगर्भेण हतेति व्यवहारस्तथा शास्त्रेऽप्येकस्मिन्नाद्यन्तव्यवहारोपपत्तिरिति लौकिकन्यायेन इयाय, आरेत्यादौ द्वित्वार्थं देवान्यक्षदित्यादौ षत्वार्थञ्चाश्रियमाणेन व्यपदेशिवदेकस्मिन्नित्यनेन सकलेष्टसिद्धये सूत्रमिदं व्यर्थमिति चेदुच्यते-व्यपदेशिवद्भावेनैकस्मिन्नाद्यन्तव्यपदेशस्य गौणतया आद्यन्तापदिष्टकार्यं गौणे न स्यादिति यस्य भ्रान्तिस्तं प्रति योगस्यावश्यकत्वात् । वस्तुतस्तु अस्य व्यवहारस्य लोकनिरूढतया गौणत्वमेव नेति नास्ति गौणमुख्यन्यायावसर इति नारब्धव्योऽयं योग इति दिक् ।

प्रश्नः—४६. संख्यासंज्ञायां संख्याग्रहणं कर्तव्यमिति वार्तिकं प्रत्याख्याय सूत्रप्रत्याख्यानप्रकारं दर्शयत ।

उत्तरम्—ननु गोपालकमानय माणवकमध्यापयिष्यति सैन्धवमानयेत्यादावर्थात्प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययवच्छास्त्रेऽपि संख्याशब्देन बह्वादीनामेव ग्रहणं स्यान्नत्वेकादिकायाः संख्याया इत्येतदर्थं पाद्मनाविप्रुष इत्यादौ षट् संज्ञावारणाय ष्णान्ताषडित्यत्रोत्तरार्थञ्च संख्यासंज्ञायां द्वितीयसंख्याग्रहणं कर्तव्यमेकादिकायाः संख्यासंज्ञा यथा स्यात् । कृत्रिमाकृत्रिमन्यायस्वीकारेऽपि नदीपौर्णमासीति सूत्रे पौर्णमास्यादिग्रहणसामर्थ्यान्नदीसंज्ञकस्य शरत्प्रभृतिषु विपाट्शब्दपाठेन तद्विशेषाणां नदीभिश्चेत्यत्र बहुवचननिर्देशादेव नदीसंज्ञकस्य स्वरूपस्य चाग्रहणेन न कश्चिद्दोष इति चेन्न । संख्यासंज्ञाज्ञानरूपप्रकरणसत्त्वेऽपि संख्याया अतिशदन्तायाः इति सूत्रे तिशदन्तप्रतिषेधेनोभयगतिरिह भवतीति ज्ञापनेनादोषात् । तेन कर्तरिकर्मेति सूत्रे कर्मपदेन क्रिया एव गृह्यते । अथवाऽब्रह्मदत्ते ब्रह्मदत्तातिदेशवत्संख्याभिन्नबहुगणातिषु संख्यावत्त्व तिदेशात्, संख्येति महासंज्ञाकरणेन संख्यायतेऽनयेत्यन्वर्थसंज्ञाबलाच्च संख्याशब्देन एकादयोऽपि गृह्यन्त एव । शक्तिवैचित्र्या-

ल्लक्ष्यानुरोधात्संज्ञापरस्यापि संख्यापदस्य सञ्ज्ञिपरत्वसम्भवेन ष्णान्ता इति स्त्रीलिङ्गनिर्देशेनान्यपदार्थत्वेन संख्याया एव ग्रहणौचित्येन चोत्तरार्थमपि संख्याग्रहणं न कर्तव्यमिति । वस्तु-तस्तु सूत्रमिदं शक्यमकर्तुम् । "बहुपूगगण-सङ्घस्य तिथुक्" "वतोरिथुक्" "षट्कतिकतिपयचतुरां थुक्" इति सूत्रैः संख्यायां विहिते डटि परे विधीयमानैरागमैर्बह्वादीनां संख्यात्वज्ञापनात्, इति दिक् ।

प्रश्नः—४७. षट्संज्ञायामुपदेशग्रहणप्रयोजनं तत्प्रत्याख्यानप्रकारञ्च प्रतिपाद्य यथालक्षणमप्रयुक्त इति भाष्याशयं प्रतिपादयत ।

उत्तरम्—ननु शतानि सहस्राणीत्यादौ नुमि कृते नान्तत्वात्षट्संज्ञावारणाय, अष्टानामित्यत्राऽऽत्वे कृतेऽनान्तत्वादप्राप्तषट्संज्ञासिद्धये च षट्संज्ञायामुपदेशग्रहणं कर्तव्यमिति चेन्न । सर्वनामस्थानसन्निपातेन जायमानस्य नुमः सर्वनामस्थान-विघातकलुक्प्रयोजकषट्संज्ञायामनिमित्तत्वात् । कृतात्वस्य षट्संज्ञाऽभावेऽ-ष्टाभिरित्यत्राष्टन्स्वरस्य चारितार्थ्येनाष्टाभिरित्यत्र परत्वाज्झल्युपोत्तममित्युपोत्त-मस्योदात्तत्वे सिद्धे अष्टनो दीर्घादिति दीर्घग्रहणेन कृतात्वस्यापि षट्संज्ञाज्ञापना-च्चोक्तप्रयोगसिद्ध्योपदेशग्रहणस्य विफलत्वात् । अथवा आकारप्रश्लेषेण आकारान्तस्यापि संख्यावाचकस्य षट्संज्ञाविधीयते । प्रश्लेषे तु 'एकास्ता' इत्यत्र षट्संज्ञाप्राप्तिस्तु न अन्यार्थपरत्वेन तस्य संख्यावाचित्वविरहात् । न च द्वाभ्यामित्यादौ दोषो दुर्घट इति वाच्यम् । "अष्टाभ्य औश्" ततः "षड्भ्यश्च यदुक्तमष्टाभ्योऽपि तद्भवति ततो "लुक्" लुक् च भवति षड्भ्य इति एवञ्च कार्यकालपक्षे कृतात्वस्यासत्यपि षट्त्वेऽतिदेशान्नुड्सिद्धेः । अथवा "अष्टन आविभक्तौ" "रायः" "हलि" इति योगविभागेन नुटि कृते आत्वसिद्धेः । न च हलादावुच्यमानमात्वं प्रियाष्टाविंत्यादौ न स्याज्जश्शसोरनुमीयमानमात्वं तु प्राधान्ये एवेति वाच्यम् । अप्रयुक्ते लक्षणाभावस्यैव योग्यता नतु लक्षणप्रवृत्तेः, लक्षणमनतिक्रम्यानुगन्तव्यं वेत्यर्थकयथालक्षणमप्रयुक्ते इति सिद्धान्तेन तस्यान-भिधानात्तत्रात्वाभावस्यैवेष्टत्वादिति दिक् ।

अथ षष्ठाह्निकम्

प्रश्नः—४८. सर्वनामसंज्ञायां णत्ववारणोपायं प्रदर्श्य संज्ञोपसर्जनीभूतानां सर्वनामसंज्ञाविषये भगवता किं प्रतिपादितमिति सप्रपञ्चं प्रतिपादयत।

उत्तरम्—सर्वनामपदे पूर्वपदात्संज्ञायामग इति णत्वं निपातनान्न भवति। ननु किमिदं निपातनं नाम। तद्धि न प्रतिषेधसजातीयकम्। तस्य निवृत्तावेवतात्पर्य्यादनेन च पुनः साधुत्वमात्रप्रतिपादनेन यथाप्राप्तणत्वप्रसङ्गात्। नचैकस्मिन् भावाभावयोर्विरोधः। प्रयोगभेदेन भावाभावयोर्विरोधपरिहारसम्भवात्। नाप्यपवादसजातीयकम्। नाप्राप्ते णत्वे आरभ्यमाणेन निपातेन णत्वबाधवत् "परस्पराः क्रियासातत्ये" इति मलोपनिपातेन यथाप्राप्तालोपबाधे सततमित्याद्यसिद्धेः। व्याकरणान्तरे "समो हिततयोर्वेति विभाषालोपेन सततं संततमिति रूपद्वयस्य साध्यत्वेन तस्येहापीष्टत्वात्, इति चेन्न। सातत्य इति न निपातनमपि तु स्थालीपुलाकन्यायेन "लुम्पेदवश्यमः कृत्ये तुङ्काममनसोरपि। समो वा हिततयो मांसस्य पचि युड्घञोरिति" श्लोको ज्ञाप्यते तेन रूपद्वयस्य सिद्धत्वेनापवादसजातीयस्यैव निपातस्येष्टत्वात्।

ननु सर्वो नाम कश्चित्तस्मै सर्वाय देहि, अतिसर्वाय देहि, अतिकतरत्ब्राह्मणकुलमतितदित्यादौ सर्वादिप्रयुक्तकार्य्याभावाय सर्वाद्यन्तर्गणकार्याभावाय च संज्ञोपसर्जनीभूतानि सर्वादिगणपठितानि नेत्येवं पाठात्तेषां पर्य्युदासः कर्तव्य इति चेन्न। पूर्वपरेति सूत्रेऽसंज्ञायामिति योगविभागेन सर्वादीनीत्येवं पञ्चत्रिंशद्यान्यनुक्रान्तानि तानि असंज्ञायां द्रष्टव्यानीत्येवं संज्ञायाम्, अमहत्पूर्वाग्रहणेन स्त्रियां तदन्तविधिलाभेनानुपसर्जनादिति योगः प्रत्याख्यायते तस्यात्र सम्बन्धं कृत्वा अकारादकारात्कारौ अनुपसर्जनस्य द्रष्टव्यावित्यर्थंकानुपसर्जन अ अ अदिति प्रश्लिष्टनिर्देशेन सर्वाद्यन्तर्गणकार्येषु अङ्गाधिकारे

यदुच्यते तत् गृह्यमाणविभक्तौ तदुद्देश्यकं वा भवतीत्येवञ्चोपसर्जनेषु दोषाभावेन संज्ञोपसर्जनीभूतानां पर्युदासवचनानावश्यकत्वात्। अति स इत्यादौ तु न दोषः। समासस्य त्यदादिप्रधानत्वात्। अथ वा "सर्वादीनि सर्वनामानी"-त्यत्र तन्त्रावृत्ती। सर्वादीनि सर्वनामसंज्ञकानि भवन्ति सर्वेषां यानि नामानि तानि सर्वादीनीत्यर्थात् सर्वेषां यानि नामानि प्रसिद्धपदवन्ति तानि सर्वनामानीत्यन्वर्थविज्ञानाच्च सर्वेष्टसिद्धौ नार्थः पर्युदासेनेति दिक्।

प्रश्नः—४९. सर्वादिगणे उभशब्दपाठप्रयोजनं तत्प्रत्याख्यानप्रकारञ्च भाष्यरीत्या व्यवस्थापयत।

उत्तरम्—ननु सर्वादिप्रयुक्तकार्यस्यैकवचनबहुवचनेष्वेव सम्भवेन द्विवचनटाब्विषयोभशब्दस्य सर्वादिगणे पाठफलाभावेन तत्पाठो व्यर्थः। उभयत इत्यादि तु सर्वादिपठितोभयशब्दादेव सिद्धमिति चेन्न। उभकावित्यत्राकजर्थं तत्र पाठस्यावश्यकत्वात् अन्यथा के सति द्विवचनपरत्वाभावेन उभयत इत्यत्रेवायच् प्रसज्येत। तद्वारणाय द्विवचनपरत्ववचनाङ्गीकारे तु सुतरां गौरवम्। अकचि तु तन्मध्यपतितन्यायेन भवति द्विवचनपरत्वम्। टाब्विषयत्वे हि सत्यपि टापाव्यवधाने एकादेशे कृतेऽन्तवद्भावेन भवति द्विवचनपरत्वम्।

यदि च स्वार्थिकाः प्रत्ययाः प्रकृतितोऽविशिष्टा भवन्तीति प्रकृतिग्रहणेन स्वार्थिकानामपि ग्रहणमित्युच्यते तदा मास्तु सर्वादिगणे उभयशब्दपाठः। अवचनादेव द्विवचनपरत्वविज्ञानादिति दिक्।

प्रश्नः—५०. विभाषा दिक्समासे बहुव्रीहाविति सूत्रस्थप्रत्येकपदस्य व्यावृत्तिः प्रदर्श्यताम्।

उत्तरम्—दिग्शब्दोच्चारणेन विहितेऽनेन विभाषाऽन्यत्र न बहुव्रीहाविति प्रतिषेध इति विषयविभागार्थमत्र सूत्रे दिग्ग्रहणम्। समासग्रहणञ्च समास एव यो बहुव्रीहिस्तत्र यथा स्याद् बहुव्रीहिवद्भावेन यो बहुव्रीहिर्दक्षिणदक्षिणस्यै इत्यत्र माभूदिति ज्ञापनार्थम्। ननु येन नाप्राप्तिन्यायेन पुरस्तादपवादन्यायेन वा दक्षिणोत्तरपूर्वाणामित्यत्र द्वन्द्वे चेत्येव निषेधसिद्धे बहुव्रीहिग्रहणं व्यर्थम्। न च बहुव्रीहिरेव यो बहुव्रीहिस्तत्र यथा स्यादेकैकस्यै देहीति बहुव्रीहिवद्भावे

मा भूदित्युत्तरार्थं बहुव्रीहिग्रहणमिति वाच्यम्। अनुवर्तमानसमास इत्यस्य बहुव्रीहिविशेषणत्वनैवेष्टसिद्धेरिति चेन्न। वस्त्रान्तरवसनान्तरा इत्यत्र बहुव्रीहि॰ गर्भद्वन्द्वावयवबहुव्रीहेः प्रतिषेधो यथा स्यादित्येतदर्थं तस्यावश्यकत्वात्।

यदि चावयवयोः सर्वनामत्वेऽपि समुदायस्य तत्त्वाभावेन जसः सर्वनाम॰ विहितत्वाभावादेव न दोष इति तदा नार्थो बहुव्रीहिग्रहणेनेति दिक्।

प्रश्नः—५१. न बहुव्रीहाविति सूत्रप्रयोजनं तत्प्रत्याख्यानप्रकारञ्च दर्शयत।

उत्तरम्—वा प्रियस्येति प्रियशब्दस्य वैकल्पिकपूर्वप्रयोगेण प्रियविश्वायेति परिच्छेदकत्वेन विशेषणत्वात् संख्यासर्वनाम्नोर्बहुव्रीहौ परत्वाच्च संख्याया एव पूर्वनिपातेन द्वयन्यायेति त्वत्कपितृक इत्यादौ अवयवसर्वनामसंज्ञानिषेध-सामर्थ्यादन्तरङ्गस्यापि नित्यविधेर्बहिरङ्गप्रतिषेधेन बाधे बहुव्रीहिपदस्य बहुव्री-ह्यर्थकालौकिकविग्रहवाक्यस्थपदपरत्वेन प्रागेव संज्ञानिषेधे चाकचोऽप्राप्त्या कप्रत्ययसिद्धिश्च न बहुव्रीहावित्यस्य प्रयोजनानि।

भाष्यकारस्तूपसर्जनप्रतिषेधेनापि प्रियविश्वायेत्यादिसिद्धिं मत्वा, अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयाविति त्वकत्पितृक इत्येवेष्टं मत्वा च सूत्रमिदं प्रत्याख्यातवानिति दिक्।

प्रश्नः—५२. अवरादीनाञ्च पुनः सूत्रपाठे ग्रहणानर्थक्यं गणे पठित-त्वादिति वार्तिकोत्थापितशङ्कां समाधाय अवरादिपदेन पूर्वपरयोः कथं ग्रहणमिति समाधीयताम्।

उत्तरम्—ननु सर्वशब्दस्य प्रकारार्थकादिशब्देन कर्मधारये सादृश्यप्रदर्शनाय सूत्रपाठानन्तरं यदि गणपाठस्तदा कृत्स्नादिपदेऽपि सर्वनामसंज्ञापत्तिः पूर्वादिभ्य इति सूत्रे नवग्रहणस्य वैयर्थ्यापत्तिश्चेति व्यवस्थावाच्यादिशब्देन सर्वशब्दस्य बहुव्रीहौ पूर्वं गणपाठस्यैव समुचितत्वेन पूर्वादीनि नवत्येवोच्यतां किमवरादीनां सूत्रपाठे ग्रहणेन। नच व्यवस्थायामसंज्ञायामिति विशेषणार्थं तेषां ग्रहणम्। तादृशविशिष्टस्यैव गणे पठितत्वात्। नापि द्वयादिपर्युदासेन पर्युदासवारणाय तेषां ग्रहणम्। पूर्वत्रासिद्धमिति निर्देशेन जसभावादिति

चेदुत्तरत्राभावादिति वार्तिकप्रयोगेण च त्यदादितः पूर्वमेव गणे पूर्वादिपाठेन "अद्व्यादिभ्य" इति तसिलादिपर्युदासाप्राप्तेरिति चेन्न । सप्तस्वेव व्यवस्थासम्बन्धः स्वेऽज्ञातिधनयोरन्तरे बहिर्योगादेरित्यसङ्करेणार्थनिर्देशाय प्रतिपदपाठस्यावश्यकत्वात् ।

अवरादीनामित्यत्रादिशब्दः प्रकारार्थकस्तेन पूर्वपरयोरपि ग्रहणम् । यत्तु लघ्वक्षरत्वादजाद्यन्तत्वाच्चावरशब्दस्यैव पूर्वनिपात उचित इति तन्न । पूर्वनिपातप्रकरणस्यानित्यत्वेन तथापाठस्याभ्युचितत्वात् इति ।

प्रश्नः—५३. अन्तरं बहिर्योग इति सूत्रे उपसंव्यानग्रहणप्रत्याख्यानप्रकारं संक्षेपेण कथयत ।

उत्तरम्—बहिःपदेन यदा बहिर्देश इत्युच्यते तदा तेन योगो बहिर्देशस्थस्यैवेति बहिर्योगपदार्थो बाह्यः । यदा च बहिःपदेन बहिर्देशस्थो विवक्ष्यते तदा तेन योग आभ्यन्तरस्यैवेति बहिर्योगपदार्थ आभ्यन्तरः । उपसंव्यानपदार्थोऽपि कर्मकरणव्युत्पत्त्योत्तरीयान्तरीयपर एवेत्युपसंव्यानग्रहणं व्यर्थम् । न च शाटकयुगे उत्तरीयत्वान्तरीयत्वाज्ञानदशायां जसि विभाषार्थं तद्ग्रहणमिति वाच्यम् । अपरिहिते शाटकयुगे उपसंव्यानत्वस्य भाविबुद्ध्यैव सम्पादनीयत्ववद् बहिर्योगत्वस्यापि तथात्वसम्भवात् । न च शाटकानां त्रये चतुष्टये वा तृतीयचतुर्थयोर्बहिर्योगाभावादुपसंव्यानग्रहणमावश्यकमिति वाच्यम् । बहिर्योगपदे स्वरितत्वप्रतिज्ञाबलेनैव तेषामपि ग्रहणसम्भवादिति दिक् ।

प्रश्नः—५४. तद्धितश्चेति सूत्रमिष्टानुपपत्तिपरिहारपुरस्सरं व्याख्याय सूत्रप्रत्याख्यानप्रकारं स्फुटं प्रतिपादयत ।

उत्तरम्—नन्वसर्वविभक्तिरित्यस्य असर्वाविभक्तिर्यस्येति विग्रहे यदा यस्य तद्धितोत्पत्तौ निमित्तत्वेन असर्वा विभक्तिराश्रितेत्यर्थस्तदा विनञ्भ्यामित्यत्र कस्याश्चिदपि प्रतिनियतविभक्तेरनाश्रयणात् विना नानेत्यादौ अव्ययत्वं न स्यात् दाक्षिरित्यत्रातिव्याप्तिश्च स्यात्तस्मादविभक्तिनिमित्तस्य, इतराभ्योऽपि दृश्यन्त इति विहितबलाद्युत्पत्तौ सर्वविभक्तीनां निमित्तत्वेनाश्रयणादव्ययत्वं न स्यादिति बलादीनाञ्चोपसंख्यानं कर्तव्यं भवेदित्येतदर्थं प्रयोगमात्रेऽश्रूयमाणविभक्तिरव्यय-

मित्यर्थकाविभक्तिरिति अलिङ्गमसंख्यमिति वा न्यासो विधेयः । न च न्यासद्वयेऽपि सत्यविभक्तित्वे संज्ञासत्त्वाच्च संज्ञायामविभक्तित्वम्, तथा सत्त्वलिङ्गासंख्यत्वे संज्ञासत्त्वाच्च संज्ञायामलिङ्गासंख्यत्वमित्येवमन्योन्याश्रयः स्यादिति वाच्यम् । स्वभावसिद्धो हि कश्चिदव्ययार्थः क्रियाप्रधानः कश्चिद्विभक्त्यर्थप्रधानः। न चैतयोरर्थयोर्लिङ्गसंख्याभ्यां योग इत्यलिङ्गासंख्यत्वस्य स्वभावसिद्धत्वात्, संख्यात्वावगमेन तद्वाचकविभक्तेरप्राप्तेश्चान्योन्याश्रयासम्भवादिति चेन्न । यथान्यासेऽपि सर्वशब्दस्यावयवकार्त्स्न्यार्थकतयाऽसर्वा विभक्तिर्यस्मादिति विग्रहे यस्मात्सर्वावयवात्मिका विभक्तिर्नोत्पद्यत इत्यर्थेनादोषात् । न चाव्ययानामलिङ्गासंख्यत्वेन विभक्तेरनुत्पादात्सूत्रस्यासम्भवदुक्तित्वं स्यादिति वाच्यम् । "एकवचनं" ततो "द्विबह्वोर्द्विवचनबहुवचने" इति न्यासं कृत्वा द्विबहुत्वयोर्द्विवचनबहुवचनाभ्यां बाधेन संख्यानवगमस्थलेऽपि "एकवचनमि" त्यस्योत्सर्गतः प्रवृत्त्या अव्ययेभ्यो विनगमनाविरहेण सर्वविभक्तीनामेकवचनोत्पत्तेः । अथवा तसिलादयः प्राक्पाशपः शस्प्रभृतयः प्राक्समासान्तेभ्य इत्यादिपरिगणनेनापि दाक्षिरित्यादौ न दोषः ।

ननु सर्वशब्दस्यावयवकार्त्स्न्यार्थकत्वे लाघवादसर्वविभक्तिरव्ययमित्येवोच्यताम् तद्धितश्चेति कृन्मेजन्त इति क्त्व तोसुन्निति स्वरादिनिपातमित्यादिपञ्चसूत्री च त्यज्यतामिति चेन्न । एकः, द्वौ, बहव इत्याद्यतद्धितानामसर्वभक्तित्वेन प्राप्तसंज्ञावारणाय तद्धितग्रहणस्यावश्यकत्वेनातद्धितानां संज्ञासिद्ध्यर्थं "कृन्मेजन्तः" इत्यादीनां स्वरादिनिपातमव्ययमित्यादीनाञ्चावश्यकत्वात् । वस्तुतस्तु पचतिकल्पमित्येतदर्थं परिगणनस्यावश्यकत्वेन गणे एव प्रतिपदं तद्धिताः पठितव्यास्तत्रैव च कृतामव्ययसंज्ञाविधायके सूत्रे अव्ययीभावश्चेति पठितव्यास्तदित्थं गणपाठमाश्रित्य तद्धितश्चेत्यारभ्य चत्वारो योगा भाष्ये प्रत्याख्याता इति दिक् ।

प्रश्नः—५५. कृन्मेजन्त इति सूत्रे मेजन्तं कृतो विशेष्यं कृदन्तस्य चेति विविच्य आधय इत्यादौ अव्ययसंज्ञावारणोपायं चोद्भाव्य प्रतिविधेयं दोषेषु इति भाष्याशयं प्रकटयत ।

उत्तरम्—ननु मेजन्तग्रहणेन पूर्वं कृतं विशेष्यीकृत्य पश्चात् कृता तदन्तविधौ कृद्यो मान्तस्तदन्तमित्यर्थं आहोस्वित् पूर्वं कृतः । तदन्तविधौ पश्चान्मेजन्तेन कृदन्तं विशेष्यीकृत्य कृदन्तं यन्मान्तमित्यर्थं इति चेदुच्यते । आद्ये कारया-

ञ्चकारेत्यादौ मान्तस्य कृत्त्वाभावात् कृद्‍ पलिटोमान्तत्वाभावाच्चाव्ययसंज्ञानुपपत्त्या अव्ययादिति स्वादेर्लुकोऽप्राप्तावपि "कृञ्चानुप्रयुज्यते लिटी"त्युपपत्तये "आम" इति सूत्रे लिग्रहणनिवृत्त्या तत एव लुक्सिद्धेः, द्वितीये प्राप्तामावित्यादौ श्रुत्वा मान्तत्वेऽपि प्रत्ययलक्षणेन कृदन्तत्वेऽपि च स्वरादिषु प्रशान्शब्दपाठसामर्थ्येन न प्रत्ययलक्षणेनाव्ययसंज्ञा भवतीति ज्ञापनेनातिव्याप्त्यभावात् पक्षद्वयस्य सुवचत्वमेवेति ।

ननु आचये चिकीर्षवे इत्यादौ गुणे कृते अन्तरङ्गानपीति परिभाषया प्राप्ताव्ययसंज्ञावारणाय कृन्मेजन्तश्चानिकारोकारप्रकृतिरिति वक्तव्यम् । कुम्भकारेभ्य इत्यत्र स्थानिवद्भावेन कृत्वादनिकारोकारप्रकृतित्वाच्च दोषसत्त्वे तु अनन्यप्रकृतिरिति वा वक्तव्यमिति चेन्न निकुचितम्, उपादास्त, शतानि, शकटौ, इयेषेत्यादौ अकित्त्वत्त्वलुक्टापामां निवृत्तयेऽवश्यं स्वीक्रियमाणया सन्निपातपरिभाषया दोषवारणसम्भवात् ।

ननु संन्निपातपरिभाषास्वीकारे दाक्षिः, क्रापयति, अदीदपत्, या, यायवान्, अग्निमान् परमवाचा, कुमारीत्यादौ अतो लोप पुग्ह्रस्वत्वटापालोपपूर्वनिपातसम्बुद्धिलोपेषु अङ्गसंज्ञाद्वारा—प्रत्ययात्वपुगत्वेण्मतुब्विभक्त्युदात्तत्वनदीह्रस्वत्वादीनामनिमित्तत्वेन समा भूयासो वा दोष एवेति चेन्न । दोषेषु प्रतिविधेयत्वात् । प्रतिविधानञ्च दोषेषु अनित्यत्वाश्रयणम् । तथाहि दाक्षिरित्यत्र प्रत्ययविधानसामर्थ्यात्, न यासयोरिति निषेधात् यासेत्यादौ, ययिवानित्यादौ च वस्वेकाजिति आकारान्तलक्षणस्वेड्विधानसामर्थ्यात्, अदीदपदित्यत्र मारणतोषणेति उपधाह्रस्वत्वार्थमित्वविधानसामर्थ्यात्, अनुदात्तं पदमेकवर्जमित्यारम्भात् परमवाचेत्यादौ, कुमारीत्यादौ गुणात्सम्बुद्धेरिति वक्तव्ये ह्रस्वग्रहणसामर्थ्यात् परिभाषाविषयेऽनित्यत्वमाश्रयणीयम् । क्रापयतीत्यत्र तु यदागमपरिभाषयैव न पुको व्यवधायकत्वमिति दिक् ।

प्रश्नः—५६. न वेति विभाषेत्यनेनार्थस्य संज्ञा शब्दस्य वेति निरूप्य "समानशब्दप्रतिषेधः" इति वार्तिकं प्रयोजनप्रदर्शनपुरःसरं प्रत्याख्याय विधेरनित्यत्वं समर्थयत ।

उत्तरम्—ननु घुसंज्ञावद्विभाषासंज्ञाऽपि नवाशब्दयोरेवेति विभाषाप्रदेशेषु नवाशब्दावेवादेशौ स्यातामिति तद्वारणाय अर्थस्य विभाषासंज्ञा वधेयेति चेन्न। गविरयमाहेत्यादावितेः पदार्थविपर्यासकत्ववदिहापि पदार्थविपर्यासकत्वेन शब्दविशेषणकार्थविशेष्योपस्थितेः सत्वान्निषेधविकल्पयोर्नवाशब्दार्थयोर्विभाषा-संज्ञासिद्धेः। नचैवं नवाकुण्डिकेत्यादौ नवाशब्दसमानार्थकस्याचिरकृताद्यार्थस्यापि विभाषासंज्ञायां दक्षिणपूर्वस्यां शालायामित्यादौ "विभाषा दिक्समासे" इति विभाषासर्वनामसंज्ञायामचिरकृतायामित्यर्थः स्यादिति तद्वारणाय समानशब्द-प्रतिषेधो वक्तव्य इति वाच्यम्। द्रव्यवाचिपदसमभिव्याहृतनवाशब्दस्य नूतनार्थाभिधायित्वेऽपि क्रियावाचकपदसमभिव्याहृतनवाशब्दस्य निषेधाभिधायि-त्वेन दिक्समासे बहुव्रीहौ सर्वादीनि सर्वनामानि भवन्ति विभाषेत्यस्सिसम्बन्धेन ग्रामो भवता गन्तव्यो न वेति लोकवन्निपातार्थप्रतिषेधस्यैवावगतेः।

ननु प्रतिषेधवाच्येकनिपातनवाशब्दस्य विभाषासंज्ञायां विभाषाश्वेरित्यादि-विधेरनित्यत्वं न सिद्ध्येत्। न च विभाषाश्वेरित्यादिनिषेधानुपपत्तिकल्पित-शास्त्रसामर्थ्येन विधिप्रतिषेधयोः पर्यायतया पिद्विषयेऽपि विधेरनित्यत्वं सिद्धये-दिति वाच्यम्। अप्राप्तविभाषास्थले तथा सम्भवेऽपि प्राप्तविभाषास्थले पूर्वविधेरन्यत्र चारितार्थ्येन विधेः कल्पनाभावात्प्रतिषेधमात्रस्यैव सम्प्रत्ययादिति चेन्न। विभाषेति महासंज्ञाकरणेन नेति च वेति चेति द्वयोः संज्ञाकरणात्। न च प्रदेशेषु विधिप्रतिषेधयोर्युगपद्विरोधाद्भावाभावौ विधातुं न शक्येत इति वाच्यम्। उभयत्र विभाषायां श्रुतक्रमानुरोधेन पूर्वं कित्सु निषेधे किदकिद्रूपे सर्वस्मिन्नेकरूप्ये प्रापिते पश्चात्पक्षे भवत्येकरूपेण विधिमुखेन विकल्पप्रवृत्ति-सिद्धेरिति दिक्।

प्रश्नः—५७. भाष्योक्तत्रिसंशयप्रकारं तन्निश्चयप्रकारञ्च स्फुटीकृत्य सूत्रस्यानावश्यकत्वं स्फुटीकुरुत।

उत्तरम्—प्रथमचरमेतिसूत्रे यदि सर्वादीनीत्यनुवर्तते तस्य च नेमशब्देऽ व्यभिचारादसम्बन्धेऽपि तयप्रत्ययान्ते द्वितयादौ व्यभिचारादुभयशब्दे सम्भवाच्च सम्बन्धस्तदा उभयशब्दे पूर्वेण प्राप्तायां नित्यसंज्ञायां अनेन विकल्पविधाना-त्प्राप्तविभाषात्वम्, अथ सर्वादीनीति नानुवर्तते पूर्वविप्रतिषेधेनोभयशब्दे नित्यैव

संज्ञा व्यवस्थाप्यते तदा द्वितयशब्दे अप्राप्तायाः संज्ञाया विकल्पविधानादप्राप्त-विभाषात्वम्, यदि परविप्रतिषेधस्तदा उभयशब्दे नित्यप्राप्तायाः, द्वितयशब्देऽ-प्राप्ताया विकल्पविधानादुभयत्रविभाषात्वं वेति सन्देहे, अयचः प्रत्ययान्तरत्वेन अस्या अप्राप्तविभाषात्वमेव निश्चयनीयम् ।

विभाषा विप्रलाप इति सूत्रे यदि व्यक्तवाचामित्यनुवर्त्य वाक्यभेदेन सम्बध्यते तदा विप्रवदन्ते वैद्या इत्यत्र पूर्ववाक्येन नित्ये प्राप्तेऽनेन विकल्प-विधानात्प्राप्तविभाषात्वम्, यदि तन्नानुवर्तते पूर्वविप्रतिषेधश्च स्वीक्रियते तदा विप्रवदन्ति शकुनय इत्यत्राप्राप्ते विकल्पविधानादप्राप्तविभाषात्वम्, अथ परविप्रतिषेधस्तदोभयत्र विभाषात्वमिति सन्देहे व्यक्तवाचामित्यनुवृत्त्या प्राप्तविभाषात्वनिश्चयः ।

हृक्रोरिति सूत्रे यदि गतिबुद्धीति सूत्रं सम्बध्यते तच्च वाक्यभेदेनान्वेति तदा गत्यर्थकप्रत्यवसानार्थकव्युपसर्गकाभ्यवपूर्वकहृधात्वोरकर्मकव्युपसर्गककृधातोश्च नित्यप्राप्तायामेव विकल्पविधानात्प्राप्तविभाषात्वम् अथ अणि कर्ता स णावित्ये-तन्मात्रसम्बन्धे पूर्वविप्रतिषेधस्वीकारे च गत्याद्यतिरिक्ते केनाप्यप्राप्तायामेव विकल्पविधानादप्राप्तविभाषात्वम् परविप्रतिषेधे च गत्याद्यर्थे प्राप्तविभाषात्व-मन्यत्राप्राप्तविभाषात्वमित्यमुभयत्र विभाषात्वं वेति संदिह्य परविप्रतिषेधेन अभ्यवहारयति विकारयति वा सैन्धवैरित्यत्राकर्मकत्वान्नित्यप्राप्तायां हारयति भारं कारयति वा कटमित्यादौ सकर्मकत्वादप्राप्तायामेव विकल्पसंज्ञाविधानेनो-भयत्र विभाषात्वमेव स्वीकरणीयम् ।

यथा मेध्यः पशुर्विभाषित इत्यादौ विभाषासंज्ञामनारभमाणा आलब्धव्यो नालब्धव्य इत्यवगच्छन्ति यथा वा विभाषासंज्ञामारभमाणा आचार्या अन्यतर-स्यामित्यादि पदघटितेषु हृक्रोरन्यतरस्यामित्यादिषु लक्ष्यानुरोधात्सूत्रं विनाऽपि उभयमुखेन प्रवृत्तिं स्वीकृत्य विधेरनित्यत्वं स्वीकुर्वन्ति तथैव विभाषापदाघटिते-ष्वपि लोकविदितत्वाल्लक्ष्यानुरोधेनोभयमुखेन प्रवृत्तिस्वीकाराच्च विधेरनित्यत्वे सिद्धे सूत्रमिदं व्यर्थम् । नानेन विभाषापदार्थस्य, अर्थाक्षिप्तशब्दमात्रस्य वा संज्ञा क्रियते येनान्यतरस्यामित्यादीनामपि सङ्ग्रहः स्यात् । अर्थे संज्ञात्वस्य समान-फलकानेकसंज्ञाकरणस्य च "अनाकृति"रित्यादिभाष्यविरुद्धत्वात् इति ।

अथ सप्तमाह्निकम्

प्रश्नः—५८. इग्यण इति सूत्रेण वाक्यस्य वर्णस्य वा संज्ञा क्रियते ।

उत्तरम्—ननु न वेति सूत्रत इति पदानुवृत्तौ इग्यण इति वाक्यस्यार्थपरत्वेन यणः स्थाने य इक् भवतीति वाक्यार्थस्य संज्ञा क्रियते न वेति प्रत्याख्याने प्रदेशेषु प्रथमानिर्देशेन वाक्यस्यैव वा तत्प्रतिपादितञ्च वाक्यं स्वार्थं प्रतिपादयिष्यत्येव अथवा सम्प्रसारणाच्चेति भिन्नविभक्तिनिर्देशेन यणः स्थाने य इग्वर्ण इति वर्णस्य । नाद्यौ, वाक्यार्थेन पौर्वापर्याभावात् असत्त्वभूतस्य तस्य स्थानित्वासम्भवाच्च सम्प्रसारणात् परः पूर्वो भवति सम्प्रसारणस्य च दीर्घो भवतीति वर्णविधिर्न सिद्धयेत् । नान्त्यः, इतरेतराश्रयत्वात् इति चेदुच्यते । काकाज्जातो यथा काकत्वाभिसम्बन्धात् काकस्तथा संप्रसारणाज्जातोऽपि सम्प्रसारणत्वारोपात्सम्प्रसारणमेवेति स्वीकारेण वाक्यैकदेशप्रयोगवत् सम्प्रसारणनिर्वृत्तात्सम्प्रसारणनिवृत्तस्येति वाक्यस्यार्थे सम्प्रसारणात् सम्प्रसारणस्येति वाक्यैकदेशप्रयोगेण सूत्रारम्भसामर्थ्येन च वर्णविधेरुपपत्तेर्वाक्यार्थस्य, अस्य सूत्रस्य शाटकं वयेतिवद् भाविसंज्ञाविज्ञानेनान्योन्याश्रयाभावाद्वर्णस्य वा संज्ञाविधाने दोषाभावेनोभयसंज्ञात्वे क्षतिविरह इति दिक् ।

प्रश्नः—५९. आद्यन्तौ टकितावित्यस्य संज्ञासूत्रत्वम् ? परिभाषासूत्रत्वं वेति विविच्य नित्येषु शब्देषु कथमागमादेशौ सङ्गच्छेते इति सुस्पष्टं निरूपयत ।

उत्तरम्—ननु नित्येषु शब्देषु आगमविधानस्यानुपयुक्तत्वेन टकितोरागमविषयत्वं न सम्भवतीति चेन्न । संज्ञाधिकारप्रस्तावेन "आद्यन्ता"वित्यस्य संज्ञासूत्रतया प्रथममाद्यन्तावित्युच्चार्य्य पश्चाट्टकारककारावितावित्युच्चारणेन आद्यन्तयोष्टकारककारावितौ संज्ञे भवत इत्यर्थे आर्धधातुकस्येति विधिसूत्रे संज्ञाभूतेतसंज्ञकटकारश्रुत्या संज्ञिभूताऽऽदेरुपस्थितौ इः ट्, आदिर्यस्येति बहुव्रीहिणा इकारादिरादेशो भवतीति विधिसूत्रार्थेन टकितोरादेशविषयत्वमेव । तथा च

अनागमकानां सागमकादेशा इति सिद्धान्तेन बुद्धिविपरिणामेन शब्दे नित्यत्व-बाधाप्रसङ्गात् । लुङ्लङ्लृङ्क्ष्वडुदात्त इत्यत्र अः ट् आदिरुदात्तो यस्येति त्रिपदबहुव्रीहिणा अटा सिद्धिमाश्रित्याऽजादीनामिति प्रत्याख्यानेन नादेशपक्षे क्वापि दोषः । ननु परसाहचर्य्यस्य बलीयस्त्वेन "मिदचोन्त्या" दिति परसाह-चर्य्यादस्य परिभाषात्वस्यैव समुचितत्वेन नित्यशब्दे पूर्वशङ्का तदवस्थैवेति चेदत्रोच्यते । "खदिरबर्बुरयोः खदिरबर्बुरी, गौरकाण्डौ सूक्ष्मपर्णा तत आह कण्टकवान् खदिर इति" अत्र यथा गौरकाण्डत्वादिना खदिरेऽपि प्रसक्तां बर्बुरबुद्धिं कण्टकवानित्यनेन निवर्त्य खदिरबुद्धिः स्थाप्यते तथेहापि प्रकृतिं वलाद्यार्धधातुक-मित्युपदिश्य पश्चादिकारमुपदिशति तेन सर्वत्र तव्यबुद्धौ प्रसक्तायामागमबोध-नद्वारा इतव्यबुद्धिः स्थाप्यते न तु इट उत्पत्तिः क्रियते तेन नित्यशब्दे नागम-विधानमनुपयुक्तमिति । अथवा पूर्वोक्तयाऽनुपूर्व्या बोधकशब्दापेक्षया भिन्नरेखा-गवयस्थानीयं शब्दमुपदिशति तत्रागमबुद्धावपि न शब्दनित्यताहानिरिति दिक् ।

प्रश्नः—६०. आद्यन्तौ टकितावित्यस्य प्रत्ययविधिविषयत्वं कथं नेति शङ्कां समाधद्ध्वम् ।

उत्तरम्—ननु "मिदचोन्त्यात्पर" इति वदाद्यन्तावित्यनेन बाध्यसामान्य-चिन्तया स्थानेयोगत्वस्येव प्रत्ययपरत्वस्यापि बाधने "चरेष्टः आतोनुपसर्गे कः" इत्यादिविहितटित्किित्प्रत्ययानामाद्यन्तावयवत्ववारणाय प्रत्ययप्रतिषेधो वक्तव्यः । न चानवकाशेन मित्करणेन प्रत्ययपरत्वस्य बाधेऽपि ङीबर्थं टित्करणस्यालोपार्थं कित्करणस्य चारितार्थ्येनानेन प्रत्ययपरत्वबाधे मानाभाव इति वाच्यम् । टित्कित्प्रत्ययानां नियोगतः परत्वे सत्येव ङीबाकारलोपप्रयोजनसम्भवेन टित्करणात्परो भविष्यति न पुनरादिः कित्करणात्परो भविष्यति न पुनरन्त इत्यनिश्चयेन परसाहचर्य्येण च बाध्यसामान्यपक्षाश्रयणस्यैवोचितत्वादिति चेन्न आद्यन्तौ टकितौ षष्ठीनिर्दिष्टस्येत्येवं षष्ठ्यधिकारेऽस्य पाठात्, अर्थनिमित्तकेन शब्देन भवितव्यमिति सिद्धान्तेन षष्ठ्यर्थप्रयोजकावाद्यन्तावेवेति प्रत्ययविधौ षष्ठ्यर्थ-त्वाभावेन तत्प्रयोजकाद्यन्ताभावावगतेश्च प्रत्ययविधावस्यानुपस्थितेरिति दिक् ।

प्रश्नः—६१. "मिदचोन्त्या" दिति सूत्रे पूर्वान्तपराद्यभक्तपक्षेषु कः पक्षः साधीयानिति सयुक्तिकं स्थापनीयम् ।

उत्तरम्—ननु पूर्वसूत्रादन्तपदानुवर्तनेनास्य पूर्वान्तत्वम् आदिपदानुवर्तनेन परादित्वम् उभयनिवृत्त्या वाऽभक्तत्वम्। नान्त्यः। कुण्डानीत्यादौ तदादिवचनं स्यादिनुमर्थमित्युक्त्याऽङ्गस्य नान्तत्वेन दीर्घसिद्धावपि तदादिवचनस्मरणे गौरवात्, तातापिण्डानामित्यत्र नकारस्य प्रातिपदिकान्तत्वाभावेन नलोपाप्राप्तेः, सर्वाणि ज्योतींषीत्यत्र नुमः सुपो व्यवधानेन 'सर्वस्य सुपी''ति स्वराप्राप्तेः, प्रह्ण्वन्नित्यादौ णत्वार्थं प्रातिपदिकान्तसूत्रे नुम्ग्रहणस्यावश्यकत्वेन माषवापाणीत्यादौ णत्वसिद्धावपि वहंलिह इत्यादौ मकारस्य पदान्तत्वाभावेनानुस्वाराप्राप्तेः, त्रपुणीत्यादौ नुमा व्यवधानेन शीभावाप्राप्तेश्च। नापि द्वितीयः। त्रपुणे, अतिसखीनि, त्रपुणीत्यादौ क्रमेण "घेर्ङिती''ति गुणस्य "अचोऽञ्णिति'' इति वृद्धेः "अच्च घे'' रित्यौत्वस्य प्रतिषेधाय वचनकरणे गौरवात्, दधीनि, तातापिण्डानाम्, वहंलिहः त्रपुणीत्यादौ "सर्वनामस्थान''इति दीर्घस्य "नलोपः प्रातिपदिके''ति नलोपस्य "मोऽनुस्वार'' इत्यनुस्वारस्य शीभावस्य च नुमाव्यवधानेनानिष्पत्तेः। तस्मादस्तु प्रथमः पक्षः न च पूर्वान्तत्वेऽपि धानाशष्कुलिनी निष्कौशाम्बिनी पञ्चारत्निनीत्यादौ अजन्तत्वाभावेन इगन्तत्वाभावेन च ह्रस्वद्विगुस्वरासिद्धिरिति वाच्यम्। ह्रस्वस्वरयोर्विभक्तिनिरपेक्षत्वेनान्तरङ्गतया नुमोऽसिद्धत्वात्, समुदायभक्तोऽसौ नोत्सहतेऽवयवस्येगन्ततां विहन्तुमिति कृत्वा द्विगुस्वरसिद्धेश्चेति दिक्।

प्रश्नः—६२. एच इग्घ्रस्वा इति सूत्रप्रयोजनमभिधाय अस्य नियामकत्वं विधायकत्वं वेति विविच्य प्रत्याख्यायतामिदं सूत्रम्।

उत्तरम्—एङो ह्रस्वादेशशासनेषु अर्ध एकारोऽर्ध ओकारो मा भूदिति सवर्णनिवृत्त्यर्थम् ऐचौ च समाहारवर्णौ मात्रावर्णस्य मात्रेवर्णोवर्णयोस्तयोर्ह्रस्वादेशशासनेषु कदाचिदवर्णो मा भूदिति सवर्णनिवृत्त्यर्थञ्च "एच इग्घ्रस्वादेश'' इति सूत्रम्।

ननु यत्र ह्रस्वो विधीयते, तत्रास्योपस्थितिर्यथा स्यात् प्लुतादिविधावस्योपस्थितिर्मा भूदिति प्रवृत्तिविषयव्यवस्थापनेन वाक्यभेदादैच इको विधीयमाना अन्तरतमा दीर्घा एव प्राप्नुवन्तीति चेन्न। "ह्रस्वो नपुंसके'' इति सूत्रेण सहैकवाक्यतयैव इगेव ह्रस्वो भवति नान्य इत्यनिको व्यावृत्त्याऽस्य नियाम-

कत्वात् । वस्तुतस्तु सुजाते एश्वसूनृते, अध्वर्यो ओद्रिभिरित्यादौ गीतवशात्तयो-रुच्चारणेऽपि लोके वेदे च तथाऽनुपलब्धेः, अर्धैकारौकारयोर्वर्णसमाम्नायेऽनुपदिष्टत्वेन तयोरसत्त्वात् सस्थानत्वेनैङ इकारोकारावेव स्यातामिति न सवर्णनिवृत्त्यर्थं सूत्रम् । एचोश्चोत्तरभूयस्त्वेन ब्राह्मणग्राम इतिवत् भूयसा व्यपदेशेन इकारोकारावेव भविष्यत नाकार इति दिक् ।

प्रश्नः—६३. षष्ठीस्थानेयोगेति सूत्रोपयोगित्वं निरुच्यताम् ।

उत्तरम्—ननु अतिप्रसङ्गवारणाय व्याख्यानत इत्यस्या आश्रयणे तयैवेष्टसिद्धौ सूत्रमिदं व्यर्थमिति चेन्न षष्ठ्यामुच्चारितायां सर्वत्र षष्ठ्यर्थशत-प्रसङ्गे व्याकरणे या षष्ठी सा स्थाने योगैवेति नियमार्थमस्यावश्यकत्वात् । ननु नियमेन सम्बन्धान्तराणां निवर्तने "शासइदङ्हलो"रित्याद्यवयवषष्ठ्याः स्थानषष्ठीत्वेन तस्योपधाविशेषणत्वे सामर्थ्याभावादन्त्यस्योपधामात्रस्य चेत्वापत्तिरिति वाच्यम् । पन्थानं मे उपदिशतु इति पथिकेन पृष्टः कश्चित् सन्देह इति कृत्वोपदिशति यदमुष्मिन्नवकाशे हस्तदक्षिणो ग्राह्योऽमुष्मिन् हस्तवाम इति यश्च तिर्यक्पथो भवति न तत्र सन्देह इति कृत्वा नोपदिशतीतिवदिहापि सन्देहे नियम इति अवयवषष्ठीस्थले उपधापदसन्निधानादवयवषष्ठीत्वनिर्णयाद-सन्देहेन नियमाप्रवृत्तेः । अथवा स्थाने अयोगा स्थानेयोगेत्यकारच्छेदात्, भूम्नि मत्वर्थीयाकारप्रत्यये योगवती योगेति स्वीकाराद्वा यत्राव्यक्तयोगा बहवो वा योगास्तत्रैवास्य प्रवृत्तिरित्यवयवषष्ठीषु नास्योपयोग इति । अथवा स्थानष-ष्ठीस्थले कलादिलिङ्गं करिष्यते नावयवषष्ठीस्थले तेन लिङ्गासङ्गस्य स्थानेयो-गत्वनियामको भविष्यति । "शाहौ" वित्यादौ तु उपधापदानुवृत्त्यभावेन यदेवादः पुरस्तादवयवषष्ठ्यर्थं तदनुवृत्तं सत्स्थाने योगार्थं भविष्यतीति नार्थः शासिग्रहणेन । न च स्वरितत्वबलादुत्तरत्र ज्ञानमात्रं भवतीत्युच्चारणं विना लिङ्गासङ्गः कर्तुमशक्य इति वाच्यम् । तर्हि आदेशे तल्लिङ्गं करिष्यते तत्र षष्ठ्यभावात्त-त्सम्बन्धिनः स्थानिनोलिङ्गकार्यस्य विश्रान्तेः । ननु षष्ठ्यर्थानां स्वस्वामित्वा-दिभेदेन बहुत्वेऽपि शब्दस्य शब्देन सह स्थानसम्बन्धस्यैव सम्भवेन सूत्रमिदं व्यर्थम् । अस्तेर्भूरित्यत्र स्थाने अनन्तरे समीपे वेति सन्देहस्तु व्याख्यानत एव निवृत्तः । किञ्च यत्रैका षष्ठी अनेकञ्च विशेष्यं प्रसङ्गरूपमवयवरूपञ्च शाहौ

हल इति तत्र विशेष्यविशेषणभावो न सिद्धयेदिति चेन्न । षष्ठ्यन्तं स्थानेन यथा युज्यते यतः षष्ठ्युच्चारितेत्येतदर्थं सूत्रस्यावश्यकत्वात् । तेन निर्दिश्यमान इति परिभाषा न कर्तव्या भवतीति दिक् ।

प्रश्नः—६४. स्थानेऽन्तरतम इति सूत्रे प्रथमान्तसप्तम्यन्तपाठयोः कतरः पक्षः साधीयानिति व्यवस्थाप्य भाष्योक्तरीत्या सूत्रं प्रत्याख्याय अस्य प्रयोजनान्तरं प्रदर्श्यताम् ।

उत्तरम्—स्थानेऽन्तरतम उरण्रपर इति संहितापाठे सप्तम्यन्तपाठपक्षे आदेशस्य सदृशतमो यः स्थानी तत्रैव षष्ठी यत्रैव षष्ठी तत्रैवादेश इति प्रकृतिनियमात् यणामर्धमात्रिकत्वेन ह्रस्वेनैव साहश्यं स्यात् मात्राद्वयन्यूनकालिकत्वेनान्तरतमत्वात्, नतु दीर्घेणेति कुमार्यर्थमित्यादि न सिद्धयेत् । प्रथमान्तपाठपक्षे तु स्थाने प्राप्यमाणानामन्तरतम आदेश इत्यर्थे आदेशनियमान्न दोष इति प्रथमान्तपाठ एव साधीयान् । न चात्र पक्षे वान्तोयीति सूत्रे एच इत्यनुवर्तनात्सर्वेषामेव वान्तादेशप्रसङ्ग इति तद्वारणाय ओदौतोरिति वक्तव्यमिति गौरवमिति वाच्यम्, यिप्रत्यय इत्येव सूत्रं कृत्वा यिप्रत्यये अयादयो भवन्तीत्यर्थेनादोषात् । चेयमित्यादौ तु नास्य प्रवृत्तिः क्षय्यजय्यौ शक्यार्थे इत्यस्य योगविभागेन ब्रह्मभ्रूणेत्यादाविव यादिप्रत्ययनिमित्तकस्यैचो यदि अयादेशः स्यात्तदा क्षिज्योरेवैचः, तयोश्च शक्यार्थे एव चेत्युभयनियमात् । नियमस्य सजातीयापेक्षत्वेन कण्ठतालव्यत्वेनैव साजात्यात् लव्यमित्यादौ न नियमेन व्यावृत्तिः । रायेश्छान्दसत्वेन न रैयतीत्यत्रायादेशापत्तिः । न च ऊदुपधाया गोह इति सूत्रे उपधाग्रहणस्यावश्यकत्वेन गौरवम् । प्रकृतितः पुनरन्तरतमनिवृत्तौ तु ऊकारान्तरतमस्य गोहवयवस्योत् इत्यर्थे तन्न कर्तव्यं भवतीति लाघवमिति वाच्यम् । अलोन्त्यपरिभाषयाऽन्त्यस्य वारणाय पक्षद्वयेऽपि तद्ग्रहणस्याऽऽवश्यकत्वात् । भिन्नवद्भ्यामित्यादौ नत्ववारणाय "रदाभ्या"मिति सूत्रे पक्षद्वयेऽपि तग्रहणं कर्तव्यमिति ।

प्रयोगे एकैकः स्थानी, अनेकश्च पुनरादेशः तस्य पर्य्यायेण बहवो दीर्घा आदेशाः प्राप्नुवन्तीति तद्वारणाय स्थानेन्तरतमवचनं नियमार्थम्, कण्ठादिस्थानयोः कण्ठादिस्थान एव यथा स्यादित्येतदर्थमिदमुच्यते ।

अशिष्योयं योगः । स्वभावसिद्धत्वात् । तद्यथा । जनसमवायेषु आस्यतामित्युक्ते न कृशाः कृशैः सहासते न पाण्डवाः पाण्डुभिः लोष्टः क्षिप्तः नैव तिर्यग्गच्छति नैवोर्ध्वम्, किन्तु येषामेव किञ्चिदर्थकृतसादृश्यं तैरेव सहासते तत्रैव च गच्छति इति लोकवदिहापि यदीयमर्थं यः शक्नोति वक्तुं तस्य स्थाने स एवेति नार्थः सूत्रेणेति ।

प्रश्नः—६५. अस्य नियमत्वं स्वतन्त्रत्वं लक्षणान्तरशेषभूतत्वं वेति विविच्य ऋवर्णस्य गुणवृद्धिप्रसङ्गे सर्वप्रसङ्गो वार्यताम् ।

उत्तरम्—यदि स्वतन्त्रमिदं लक्षणं स्यात्तदा सर्वस्थानिनां निवृत्तिसम्भवेन दधि मधु इत्यादौ आन्तरतम्यात्तयोरेवादेशेन दोषवारणेऽपि विस मुसलमित्यादौ सकारस्य सकारादेशे षत्वापत्तिः स्यात् । अपि च यथा तप्ते भ्राष्ट्रे तिलाः प्रक्षिप्ता मुहूर्तमपि नावतिष्ठन्ते तथा वर्णा अपि नावतिष्ठेरन् इति साधुत्वव्यवस्था न स्यात् । यदि लक्षणान्तरेणाभिनिर्वृत्तानामनेन नियमः क्रियते तदा भुक्तवन्तं प्रति मा भुङ्क्था इति न्यायेन सूत्रस्य निर्विषयत्वापत्तिः स्यात् । तस्मात् षष्ठ्यधिकारेऽस्य पाठेन षष्ठीनिर्दिष्टस्य स्थाने अन्तरतम एव भवतीति विधिवाक्यैकवाक्यतायां विधानकाले एव अन्तरतमादेशविधानेन सर्वेष्टसिद्धौ अस्य लक्षणान्तरशेषभूतत्वमेव युक्तम् ।

ननु ऋवर्णस्य स्थाने गुणवृद्धिप्रसङ्गे सर्वगुणवृद्धिप्रसङ्गः, अनान्तरतम्यादिति चेन्न, उरणरपर इत्यनेन गुणवृद्धिशास्त्रैकवाक्यतायां विधीयमान एवाण् रपरो भवतीति ऋश्रुतेरुः स्थानेऽरारौ क्रियमाणौ गुणवृद्धी भवत इत्यर्थेनादोषात् । अनेकाल्त्वात् सर्वादेशप्रसङ्गस्तु न । यदानेकाल् स्यात्तदा सर्वादेशः स्यादित्यलोन्त्यपरिभाषा सर्वादेशपरिभाषोपजीव्येत्युपजीव्यविरोधस्यान्याय्यत्वेन न सर्वादेशपरिभाषाऽलोन्त्यपरिभाषां बाधत इति स्वीकारात् ।

अथवा अनान्तर्यमेव तयोरान्तर्यमिति स्वीकारात्, नष्टाश्वदग्धरथन्यायाद्वाऽकाराऽऽकारौ गुणवृद्धी भवतो नैकारादीति दिक् ।

प्रश्नः—६६. उरण रपर इति सूत्रं नियमार्थं, विध्यर्थं लक्षणान्तरशेषभूतं वेति निरुच्य अण् ग्रहणप्रयोजनमुच्यताम् ।

उत्तरम्—ननु उरण् रपर इति सूत्रम् उः स्थानेऽणामननाच्च प्रसङ्गेणैव स च रपर इति वाक्यभेदेन रपरत्वं विधीयत इत्येव नियमः । किं वा उः स्थाने लक्षणान्तरेण निष्पन्नो योऽण् स रपर इत्येवं विधिः । अथवा उः स्थाने अण् प्रसङ्गावस्थायामेव रपरो भवतीत्येव लक्षणान्तरशेषभूतम् ? नाद्यः कृतिः; कृतम्, प्रकृतम्, नॄंःपाहीत्यादौ अन्तरतमपरिभाषां बाधित्वा ऋकारस्य उदात्तानुदात्तस्वरितानुनासिकगुणविशिष्टाणोरपरत्वस्य च प्रसङ्गात् । नापि द्वितीयः । गुणवृद्धिविधौ दीर्घस्याकारगुणालाभात् । ऋवर्णस्यान्तरतमाकारगुणादेश इव एङैचोरपि गुणवृद्धयोः प्रसङ्गाच्च । अपि च द्वयोः परिभाषयोः सावकाशयोः परत्वादन्तरतमपरिभाषां बाधित्वा उरण् रपरप्रसङ्गे कृतोत्यादौ उदात्तादिषु पूर्वोक्तदोषतादवस्थ्यात् । नियमप्रसङ्गे ऋत इद्धातावित्यादौ अस्याप्रवृत्तेश्च । तस्मादन्त्यपक्ष एव श्रेयानिति ।

अत्राण्ग्रहणाभावेऽपि उः स्थाने यः स रपरो भवतीत्यर्थे कस्यास्य स्थाने भवतीत्याकाङ्क्षायामादेश एव लभ्येत इति चेन्न । सौघातकिरित्यत्राकङादेशे रपरत्वापत्तेः, पैतृष्वसेय इत्यत्र ऋलोपे रपरत्वप्रसङ्गेन लोपस्य सर्वादेशत्वापत्तेश्च । केवलरेफस्यैव वा श्रवणापत्तेः आनङनङरीङ्रिङादेशेषु उदात्तानुदात्तस्वरितानुनासिकेषु च रपरत्वापत्तेश्चेति दिक् ।

प्रश्नः—६७. एकादेशस्योपसंख्यानमिति वार्त्तिकं प्रत्याख्याय किं पुनरयं पूर्वान्तः आहोस्वित्परादिः, आहोस्विदभक्त इति शङ्का समाधीयताम् ।

उत्तरम्—खट्वर्श्यो मालर्श्यं इत्यादौ उभयोः स्थानित्वेन ऋमात्रस्य स्थानित्वाभावेन तत्र रपरत्वसिद्धये एकादेशस्योपसंख्यानं न कर्तव्यम् । पूर्वपरयोरित्यनेन पूर्वपरयोरवयवयोः स्थानित्वबोधनेन समुदायस्यावयवाभेदेन द्विवचनेन प्रत्येकं तयोः स्थानित्वे ऋकारमात्रस्यापि स्थानित्वाबाधात् । नन्वेवं होतापोतारावित्यादौ अवयवगताण्त्वाश्रयेण आनङाद्यादेशे रपरत्ववारणाय रान्त प्रतिषेधः कर्तव्यः । न च ऋवर्णान्तस्य स्थाने विधीयमानोऽण् रपर इति व्याख्याने न दोष इति वाच्यम् । कर्ता किरतीत्यादौ ऋवर्णान्तस्य स्थानित्वाभावेन रपरत्वाप्रसक्तेः । व्यपदेशिवद्भावेन ऋवर्णान्तत्वं तु न युक्तम् । अयंवता-

व्यपदेशिवद्भावस्वीकारादिति चेन्न । देवदत्तस्य पुत्रः देवदत्तायाः पुत्र इतिवत् यो द्वयोः षष्ठीनिर्दिष्टयोः प्रसङ्गे भवति असावन्यतरतो व्यपदेशं लभत इति सिद्धान्तात् कस्कादिषु भ्रातुष्पुत्रशब्दपाठसामर्थ्येन एकादेशशास्त्रनिमित्तकस्य षत्वाभावज्ञापनेन मातुः करोतीत्यादौ षत्वाप्राप्त्या तदर्थं षत्वप्रतिषेधवचनमनावश्यकमिति ।

उरण् रपर इत्यत्र आदिपदानुवृत्त्या यद्यस्य परादित्वं क्रियते तदा कर्तेत्यादौ अतो लोप इत्यत्रोपदेशपदानुवृत्त्या दोषवारणेऽपि चकारेत्यादौ "आत औ णल" इत्यस्य निर्दिश्यमानपरिभाषया वारणेन दोषाभावेऽपि च कारयतीत्यादौ युगापत्तिः स्यात्, अचोकिरदित्यादौ अनुपधात्वेन ह्रस्वत्वं न स्यात्; आस्तरितेत्यादौ नित्यत्वाद्गुणे रपरत्वे च नेड्वशीति निषेधादप्रवृत्तिलक्षणेटोऽव्यवस्था प्रवृत्तौ वा रेफात्पूर्वमिटि अनिष्टाव्यवस्था प्राप्नोति, ववृते माहि स्म ते पिपरुः गीः पूरित्यादौ हलादिः शेषाभ्यस्तस्वरदीर्घा न सिद्ध्येयुः । अभक्तत्वे गीः पूरित्यादौ रेफान्तस्य धातुत्वानुपपत्त्या दीर्घत्वं न स्यात् । "ग्रो यङि" इत्यत्र ग्रइत्यस्य पञ्चम्यन्तत्वेन निजेगिल्यते इत्यत्र लत्वसाधनेऽपि गीर्यते स्वयमेवेत्यत्र मा हि स्म ते पिपरुरित्यादौ च स्वरो न स्यात् । रेफेण व्यवहितत्वात् । स्वरविधौ व्यञ्जनमविद्यमानवदित्यस्य तु न प्रवृत्तिः । स्वरोद्देश्यविधित्वाभावात् । ववृते इत्यादौ हलादिः शेषो न स्यात् । नार्कुट इत्यादौ विसर्गापत्तिः स्यात् रेफान्तस्य पदत्वात् । किरत इत्यादौ रेफस्याभक्तत्वेन प्रत्ययव्यवस्था न स्यात् । तस्मादन्त्रान्तपदानुवृत्त्या पूर्वान्तत्वपक्ष एव ग्राह्यः । अत्र पक्षे गीर्षु इत्यादौ विसर्गवारणाय रोः सुपीति करणे न गौरवम् । परादित्वेऽपि चतुर्षु इत्येतदर्थं सूत्रस्यावश्यकत्वात् । नार्कुट इत्यादौ विसर्गवारणाय विसर्जनीयप्रतिषेधस्तु परादित्वेऽपि नार्कलिपरित्यर्थं कर्तव्यमेव । अचः कित्ति सूत्रे उपदेशपदानुवृत्त्या गीर्यत इत्यादौ यक्स्वरसिद्धिरिति नात्रपक्षे दोषलेश इति दिक् ।

अथ अष्टमाह्निकम्

प्रश्नः—६८. स्थानिवत्सूत्रस्य पदकृत्यं प्रदर्श्य अनल्विधावित्यस्यार्थं सिद्धान्तसिद्धं भाष्यदिशा दर्शयत ।

उत्तरम्—अत्र वद्ग्रहणाभावे संज्ञाप्रस्तावात् स्थानी आदेशस्य संज्ञा स्यात्तया च "आङो यमहन" इत्यात्मनेपदावधेरेव स्यान्न तु हन्तेः । वद्ग्रहणे पुनः क्रियमाणे स्थानिकार्यस्य आदेशे अतिदेशान्न दोष इति । स्थानिशब्दस्य सम्बन्धिशब्दत्वात् स्थानिपदमहिम्नैव आदेशे लब्धे पुनरादेशग्रहणमादेशमात्र-ग्रहणार्थम् । तेन शब्दालित्यत्ववारणाय "एरु"रित्यादेरिकारान्तबुद्धिप्रसङ्गे उकारान्तबुद्धिः कर्तव्येत्याद्यर्थम् आनुमानिकादेशस्याप्यत्र ग्रहणात् पचत्वित्यादौ पदत्वसिद्धौ एकदेशविकृतन्यायोपसंख्यानं न कर्तव्यं भवतीति ।

प्रातिपदिकनिर्देशस्यार्थतन्त्रतया तन्निर्देशेनैव अला, अलः, अलाम्, अलि इति विभक्तिचतुष्टयस्य लाभेन व्यूढोरस्केन, द्यौः, पन्थाः, द्युकामः, क इष्टः इत्यादिसिद्धौ विधिग्रहणं पुनः क्रियमाणम् अप्राधान्येनालाश्रयणेऽपि निषेधार्थम् । तेन प्रदीव्य इत्यादौ वलादिलक्षण इण्नेति । न चैवमपि ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यमित्यत्र यथा सामान्यब्राह्मणकार्यस्यातिदेशेऽपि विशेषधर्मस्य नाति-देशस्तथा प्रदीव्येत्यादौ विशेषधर्मस्य वलादित्वस्यालाभेनेटोऽप्राप्त्या विधिग्रहणं व्यर्थमेवेति वाच्यम् । विशेषातिदेशज्ञापनार्थमेव तस्यावश्यकत्वात् । अग्रहीदि-त्यादौ तु न दोषः, सलोपे इट्त्वस्यैवाश्रयणेनानल्त्वात् । अरुदितामित्यादा-वपि न दोषः, वलादित्वस्य स्वाश्रयत्वेन सार्वधातुकत्वमेव तत्र स्थानिवद्भावेन प्रार्थ्यते न च स स्थान्यलसाधारण धर्म इति ।

किं पुनः स्थान्यलाश्रये स्थानिवत्त्वप्रतिषेध आहोस्विदादेशसम्बन्ध्यलाश्रयेऽपि । अन्त्ये वृक्षायेत्यादौ यञादित्वस्याल्त्वेन तदाश्रयदीर्घो न स्यात्, अरुदिता-मित्यादौ वलादित्वस्याल्त्वेन तल्लक्षण इण्न स्यात्, भुवनमित्यादौ उवङ् न स्यात् उवङादेशस्याजादित्वेनालाश्रयत्वात् । तस्मादाद्यपक्ष एव युक्तः । न चात्र

पक्षे कुरु, पिब, वधकमित्यादौ स्थानिवद्भावादङ्गसंज्ञा स्वाश्रयश्च लघूपधत्वम-दुपधत्वमिति गुणवृद्धयापत्तिरिति वाच्यम्। करोतौ तपरकरणेन पिबादेशस्या-दन्तत्वेन वधक इत्यत्र हनो वध चेति वुन् प्रत्ययेन पूर्वोक्तदोषाभावादिति दिक्।

प्रश्नः—६९. स्थानिवत्सूत्रं प्रत्याख्याय आरभ्यमाणे पुनरस्मिन्नुयोगे प्राप्तदोषान्निराकृत्य नित्येषु शब्देषु स्थान्यादेशभावः कथं सङ्गच्छत इत्युपपादनीयः।

उत्तरम्—ननु तत्स्थानापन्नस्तद्धर्मं लभत इति लौकिकन्यायस्य "स्वं रूपमि"ति शास्त्रेण बाधात् "आङो यमहन" इत्यात्मनेपदं हन्तेरेव स्यान्नतु वधेस्तदर्थमिदं सूत्रमिति चेन्न। "युष्मदस्मदो"रिति सूत्रेऽनादेशग्रहणेन स्थानि-कार्यमादेशेऽपि भवतीति ज्ञापनात्। न चाप्रदर्शितप्रतिषेध्यप्रतिषेधोऽशक्य इति अनल्विधाविति साफल्याय सूत्रमिति वाच्यम्। "अदो जग्धि"रिति सूत्रे ल्यब्ग्रहणेन अल्विधौ स्थानिवत्त्वं नेति कल्पनेन निषेधवाक्यस्यापि वैफल्यात्।

ननु यदि मन्दमत्यनुग्रहाय "न पदान्त" इति निषेध्यसमर्पणाय च सूत्रमा-रभ्यते तदा उभये इत्यत्र अयचस्तयपो ग्रहणेन ग्रहणादतिव्याप्तिरिति चेन्न। अयचः प्रत्ययान्तरत्वात्। जात्याख्यायां वचनातिदेशे स्थानिवत्त्वप्रतिषेधस्तु न, तत्र बहुवचनशब्दस्यार्थपरत्वेनास्यार्थातिदेशपरत्वात्। ङ्याब्घटितसूत्रे ङो ई आ आबिति प्रश्लेषेण निष्कौशाम्बिरित्यत्र सुलोपाऽप्राप्त्या ङ्याब्ग्रहणेऽदीर्घं इति वचनं नारब्धव्यम्। "ब्रुवः पञ्चाना"मिति सूत्रे आथ् विधानेनैवेष्टसिद्धे "आहस्थ" इत्यारम्भेण नाहेरीड्भवतीति ज्ञापनेन "अस्तिसिच" इति सूत्रे द्विसकारनिर्देशेन च नाहिभुवोरीट्प्रतिषेधः कर्तव्यः। वध्यादेशे वृद्धितत्वप्रतिषे-धोऽपि न कर्तव्यः, वधक इत्यस्य वुन्नन्तत्वात्। वधेराद्युदात्तत्वनिपातनेन आवधिषिष्टेत्यत्र इण्निषेधे कर्तव्ये स्थानिवत्त्वप्रतिषेधो न वक्तव्यः। आकारान्ता-न्नुक्षुकोः प्रतिषेधो न वक्तव्यः ली ई भी ई इति लीभियोः प्रश्लिष्टनिर्देशात्। लोडादेशे शाभावादयस्तु न प्राप्नुवन्ति सकृद्गताविति न्यायात्। एतन्न्यायादेव त्र्यादेशे आम्विधौ च स्रन्तस्य प्रतिषेधो न वक्तव्यः। अनुमः प्रत्याहारग्रहणेन, प्रतिपदोक्तङन्तस्य प्रकृतिभावविधानेन, "गोतो णिदि"ति सूत्रे तपरकरणाद्-

गकारस्याविवक्षणेन च गोः पूर्वणित्वात्स्वरेषु प्रतिषेधो न विधेयः। बहुगुमानित्यत्र स्थानिवत्त्वेन गोत्वमादाय स्वराप्रतिषेधार्थं स्थानिवत्त्वप्रतिषेधस्तु वक्तव्य एवेति। ननु यो भूत्वा न भवति स स्थानी योऽभूत्वा भवति स आदेशस्तच्च नित्येषु शब्देषु नोपपद्यते यतः सतो विनाशः असतः प्रादुर्भाव इति प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वस्यैव नित्यत्वादिति चेन्न। उपाध्यायस्य स्थाने शिष्य इत्यत्र नोपाध्यायो भूतपूर्वो भवतीतिवत् स्थानशब्दस्य प्रकृते प्रसङ्गवाचित्वात्। अथवा कार्यविपरिणामात्सिद्धम्। कार्या बुद्धिः सा विपरिणंस्यते। ननु भूतपूर्वे स्थानशब्दप्रयोगमभ्युपेत्यैवेदं परिहारान्तरं तच्च न सम्भवति उपाध्यायस्येत्यादिदृष्टान्तादिति चेन्न। प्राचीनं ग्रामादाम्रा इत्यादौ यथा आम्रबुद्धया न्यग्रोधबुद्धिं प्रतिपद्यते तथैव "अस्तेर्भू"रित्यनेनास्तिबुद्धया भवतिबुद्धिं प्रतिपद्यत इति बुद्धया भूतपूर्वेऽपि स्थानशब्दप्रयोगदर्शनादिति दिक्।

प्रश्नः—७०. अचः परस्मिन्निति सूत्रे अचः, परस्मिन्, पूर्वविधावित्यादीनां व्यावृत्तिः प्रदर्शनीया।

उत्तरम्—अत्र अचो ग्रहणाभावे प्रश्नो विश्न इत्यत्रान्तरङ्गत्वात्कि सतुक्छस्य स्थानिवत्त्वेन तुग्वारणेऽपि, द्यूत्वेत्यादौ ऊठ आदेशत्वेन य आदेशः नासौ आश्रीयते यश्चाश्रीयते नासौ आदेश इति कृत्वा यणसम्पादनेऽपि, आक्राष्टामित्यादौ पूर्वत्रासिद्धे न स्थानिवदिति निषेधेन "षढोः कः सी"त्यनेन कत्वाभावसम्पादनेऽपि आगत्येत्याद मलोपस्य स्थानिवत्त्वेन 'ह्रस्वस्ये"ति तुङ् न स्यात् अजग्रहणे पुनः क्रियमाणे न दोषो भवतीति।

परस्मिन्नित्यस्य ग्रहणाऽभावे युवजानिरित्यत्र निङः आदेशत्वेन योऽत्रादेशो नासौ आश्रीयते, यश्चाश्रीयते नासावादेश इति कृत्वा यलोपसम्पादनेऽपि, यस्येति लोपेनैव सिद्धे पादशतस्येति लोपविधानसामर्थ्यात् द्विपदिकेत्यादौ पद्भावसम्पादनेऽपि वैयाघ्रपद्य इत्यत्र "पादस्य लोप" इति लोपस्य स्थानिवत्त्वेन पद्भावो न स्यात्तस्मात्परस्मिन्निति कर्तव्यम्। अत्र लोपवचनस्य सामर्थ्यवर्णनं न युक्तम् भसंज्ञारहिते व्याघ्रपादित्यादौ चारितार्थ्यात्। एवम् आदीध्ये इत्यपि परस्मिन्निति ग्रहणफलम्। अन्यथा इकारस्थानिकेकारस्य स्थानिवत्त्वेन

यीवर्णयोरिति लोपः स्यादिति । पूर्वविधिग्रहणाभावे ओह्रस्वादित्येव सिद्धे यदेङिति प्रत्याहारग्रहणं करोति तेन सम्बुद्धिलोपे स्थानिवत्त्वाप्रवृत्तिकल्पनेन हेगौरित्यत्रादोषेऽपि, वान्तसमुदायस्याऽऽदेशत्वेऽपि तस्य लोपं प्रति निमित्तत्वाऽभावेन स्थानिवत्त्वाऽप्राप्त्या बाभ्रवीया इत्यत्र यलोपसिद्धावपि, नैवेय इत्यत्र आलोपस्य स्थानिवत्त्वेन द्व्यज्लक्षणढगनापत्तिरिति पूर्वविधिग्रहणमिति दिक् ।

प्रश्नः—७१. अचः परस्मिन्निति सूत्रे विधिग्रहणफलं निरूप्य अपरविधाविति वार्तिकोत्थानबीजं तत्प्रत्याख्यानप्रकारञ्च निरूपयत ।

उत्तरम्—अत्र विधिग्रहणं पूर्वस्य विधिः पूर्वस्माच्च विधिरिति समासद्वयलाभार्थम् । तेन वेभिदितेत्यत्राल्लोपस्य स्थानिवत्त्वात् एकाज्लक्षणेटः प्रतिषेधो न माथितिक इत्यत्र इकः कादेशो न अपोपत्रन्तीत्यत्र जुम् न । यदि तु प्रातिपदिकनिर्देशस्यार्थतन्त्रतयाऽर्थद्वये लब्धे विधिग्रहणं व्यर्थमित्युच्यते तदा स्थानिवदेव यथा स्यात् मा भूत् स्वाश्रयमिति लाभार्थं विधिग्रहणम् । तेन वाय्वोरित्यादौ "लोपोव्या"रिति यलोपा नेति ।

स्वविधौ स्थानिवत्त्वसाधनाय एकदेशी अपरविधाविति वार्तिकमारब्धवान् । तेन आयन्नासन्नित्यादौ यणलोपयोः स्थानिवत्त्वेनाजादित्वादाट्सिद्धिः, धिन्वन्तीत्यादौ यणः स्थानिवत्त्वादिण्न, दध्यत्रेत्यत्र संयोगान्तलोपो न, चक्रतुरित्यादौ कृते यणादेशेऽनच्कत्वेऽपि स्थानिवत्त्वेन द्विर्वचनं सिद्धयति । "द्वयोरेकस्य डतरच्" "देयमृणे" "किरतौ लवने" इत्यादिनिर्देशेन आदेशाश्रया अत्र ते विषयो भवन्तीति ज्ञापनात् द्वाभ्याम्, देयम्, लवणमित्यादौ दीर्घगुणावादेशाः सिद्धयन्ति । भगवता तु निमित्तापेक्षया पूर्वत्वविज्ञानेन, कर्मसाधनविधिशब्दोपादाने न सर्वमिष्टं संगृहीतं भवतीति भावसाधनविधिशब्द स्वीकृत्य पूर्वस्य विधानं प्रति पूर्वस्य भावं प्रति पूर्वः स्यादिति स्वीकारेण च तत्फलानि संसाध्य वार्तिकं खण्डितम् । यणः प्रतिषेधारम्भात् दध्यत्रेत्यादौ, "द्विर्वचनेऽची"ति निषेधात् चक्रतुरित्यादौ च न दोष इति दिक् ।

प्रश्नः—७२. अचः परस्मिन्निति सूत्रस्य प्रयोजनानामन्यथासिद्धिप्रकारं प्रदर्श्य अनन्यथासिद्धोदाहरणानि प्रदर्शनीयानि ।

उत्तरम्—कानि पुनरस्य योगस्योदाहरणानीति चेदुच्यते पादिकमित्यत्र अल्लोपस्य स्थानिवत्त्वात् पद्भावो न, औदवाहिमित्यत्र अल्लोपस्य स्थानिवत्त्वात् ऊण्न, शातनीं पातनीमित्यत्र ङीषि अल्लोपस्य स्थानिवत्त्वादिलोपो न, स्रंस्यते ध्वंस्यत इत्यत्र दिलोपस्य स्थानिवत्त्वात् "अनिदिता"मिति नलोपो न, धारणि रावणिमित्यादौ इति कृताल्लोपस्य स्थानिवत्त्वाट्टिलोपो न यदि च असिद्धवत्सूत्रेणैव तत्र तत्र दोषाभाव इत्युच्यते तदा पट्व्या, मृद्व्येत्यादौ नित्यत्वात्परयणादेशे कृते तस्य स्थानिवत्त्वात्पूर्वयणादेशः फलम्। न च कर्त्र्येत्यादौ कर्तृ ई आ इति स्थिते नित्यत्वात्पूर्वं परयणादेशे ततः स्थानिवत्त्वेन पूर्वयणादेशे रूपसिद्धावपि आकारस्योदात्तयणोऽनन्तरत्वाभावेन उदात्तत्वं न स्यात्तदथ बहिरङ्गपरिभाषास्वीकारस्यावश्यकत्वेन तयैव पट्व्येत्यादावपि यण्सिद्धौ नैतानि सूत्रोदाहरणानीति वाच्यम्। पटयति, अवधीदित्यादौ टिलोपाल्लोपयोः स्थानिवत्त्वेन वृद्ध्यभावस्यैव फलत्वात्। बहुखट्वक इत्यादौ कृतह्रस्वस्य स्थानिवत्त्वेन स्वराभावस्य फलत्वाच्चेति दिक्।

प्रश्नः—७३. काममतिदिश्यतां वा सच्चासच्चापि नेह भारोऽस्ति इति वार्तिकं सोपष्टम्भं व्याख्याय किं पुनरनन्तरस्य विधिं प्रति स्थानिवद्भाव आहोस्वित्पूर्वमात्रस्येति शङ्का समाधीयताम्।

उत्तरम्—नन्वतिदेशेन पराश्रयं कार्यं प्राप्यते न तु स्वाश्रयं निवर्त्यत इति वाय्वोरित्यत्र स्वाश्रयवल्त्वमादाय यलोपवारणाय असिद्धवचनम्. पट्व्येत्यादौ पूर्वयणपेक्षया परयणोऽसिद्धत्वेऽपि स्वाश्रयाचपरत्वाभावमादायाप्राप्तयणः साधनाय स्थानिकार्याणामतिदेशवचनञ्च कर्तव्यमिति चेन्न असिद्धवचनस्य शास्त्रासिद्धपरत्वात्। एवमसिद्धवचनमात्रेण निर्वाहमुक्त्वा सूत्रकृत स्थानिवत्त्वं समर्थयति "कामभि"ति उशीनरवन्मद्रेषु यवा इतिवद् भावाभावयोरुभयोरप्यतिदेशः अनेन क्रियत इति तात्पर्यम् अनुवृत्तविधिशब्दसामर्थ्येन उभयोः शास्त्रे आश्रयणात्तदर्थं विधिशब्दकरणभारो नेत्याह "नेह भारोऽस्ती"ति। नन्वमीषां ब्राह्मणानामन्त्यात्पूर्वमानयेत्यत्रानन्तरे पूर्वशब्दो दृष्टः, मथुरायाः पूर्वं पाटलिपुत्रमित्यत्र व्यवहिते इत्यनन्तरस्य विधिं प्रति स्थानिवद्भावः किंवा पूर्वमात्रस्य? आद्य

लुनीह्यत्रेत्यत्र यणि कृते उदात्तत्वाभावेन शेषनिघातो न स्यात् । पञ्चारत्न्य इत्यत्र यणि कृते "इगन्त" इति स्वरो न स्यात् । यत्प्रलुनीह्यत्रेत्यत्र यणि उदात्तत्वाभावात् "तिङि चोदात्तवती"त्येष स्वरो न स्यात् । तस्मादन्त्यपक्ष एव युक्तः । न चावीवदद्वीणां परिव्राजकेनेत्यत्र णिलोपस्य स्थानिवत्त्वादुपधाह्रस्वत्वं न स्यादिति वाच्यम् । "क्विलुगुपधात्वे"ति स्थानिवत्त्वनिषेधात् । पित्तघ्न इत्यादौ तु संयोगसंज्ञायाः पूर्वपरोभयनिमित्तत्वेन स्थानिवत्त्वाप्राप्त्या संयोगसंज्ञायां गुरुसंज्ञायां सत्यां प्लुतः सिद्धो भवतीति दिक् ।

प्रश्नः—७४. एकादेशस्योपसंख्यानं कर्तव्यमिति वार्तिकप्रयोजनं प्रदर्श्य तत्प्रत्याख्यानप्रकारञ्चोद्भाव्य हलचोरादेशः कथं न स्थानिवदिति विचार्यताम् ।

उत्तरम्—एकादेशस्योभयनिमित्तत्वेनोभयादेशत्वेन च च श्रायसो, चातुरो, पादे, उद्वाहे इत्यादौ एकादेशे कृते स्थानिवत्त्वाऽप्राप्त्याऽऽदिवद्भावेन प्राप्तनुमामुपद्भावोड्विधिप्रतिषेधाय एकादेशस्योपसंख्यानं न कर्तव्यम् गुरुर्निमित्तं वसामोऽध्ययननिमित्तं वसाम इतिवदुभयनिमित्तत्वेऽपि अन्यतरनिमित्तव्यपदेशस्य देवदत्तस्य पुत्रो देवदत्तायाः पुत्र इति वच्च द्वयोः षष्ठीनिर्दिष्टयोः प्रसङ्गेऽन्यतरादेशव्यपदेशस्य च सम्भवेन स्थानिवत्त्वसिद्धः ।

ननु अच इत्यस्य परस्मिन्नितिवदयोगव्यवच्छेदकत्वेन हलचोरादेशः स्थानिवत् । किं वाऽन्ययोगव्यवच्छेदकत्वेन अज्मात्रस्थानिकादेश इति । आद्ये विशक इत्यादौ तिलोपस्य स्थानिवत्त्वात् "अतोगुण" इति पररूपं न स्यात् । स्थवीयानित्यादौ यणादिलोपे तस्य स्थानिवत्त्वादवादेशो न स्यात् । कैकेय इत्यादौ "केकयमित्रयु" इत्यनेन इयादेशे "आद्गुण" इति गुणो न स्यात् । चेच्यः, चेक्षियः, लोलुव, इत्यादौ यङः स्थानिवत्त्वेन यणियङुवङो न सिद्ध्यन्तीति द्वितीयपक्ष एव युक्तः । न चात्र पक्षे लोलुवः, मरीमृज इत्यादौ गुणवृद्धिप्रसङ्गः । "न धातुलोप" इति निषेधादिति दिक् ।

प्रश्नः—७५. "न पदान्त" सूत्रे विधिशब्दो भावसाधनः कर्मसाधनो वेति सयुक्तिकमुपपाद्यताम् ।

उत्तरम्—अत्र विधिशब्दो भावसाधनः कर्मषष्ठ्यन्तेन पदान्तशब्देन समासे

पदचरमावयवकर्मकविधौ न स्थानिवदिति तदर्थः। कर्मसाधने तु पदान्तस्थानिके विधावित्यर्थे षडिक इत्यत्र षडङ्गुलिशब्दाट्ठचि "ठाजादावूर्ध्वं"मिति ङ्गुलिशब्दस्य लोपेऽल्लोपे च परम्परया भत्वस्यापि पदान्तोद्देश्यककार्यत्वेन स्थानिवत्त्वनिषेधे भत्वपदत्वयोः समानावधिकत्वेन भत्वेन अन्तर्वर्त्तिविभक्तिनिमित्तकस्यापि पदत्वस्य बाधात् जश्त्वं न स्यात्। भावसाधने तु उपस्थितत्वात् पदत्वद्वारिकैव परम्परा गृह्यते। पदचरमावयवसाधके परम्परा तु पदत्वान्यद्वारिकैवेति भत्वे निषेधाभावेन स्थानिवत्वादकारान्ते भत्वेऽपि षान्ते पदत्वस्याबाधने जश्त्वं सिद्धयति न चैवं वागाशीर्दत्तशब्दे शीर्दत्तशब्दस्य उक्तप्रकारेण लोपे आकारलोपे च तस्य स्थानिवत्त्वेन भत्वाऽभावेऽन्तर्वर्तिविभक्त्या पदत्वेन वाचिक इत्यत्र कुत्वापत्तिरिति वाच्यम्। "एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्य" इत्यनेनाऽऽशीर्दत्तशब्दस्यैव लोपेन स्थानिवत्त्वाप्राप्त्या तुल्यावधिकभत्वेन पदत्वबाधात्। षडिक इत्येतदर्थन्तु "षषष्ठाजादावूर्ध्व"मिति पठनीयमिति न दोषः। न चैवं वेतस्वानित्यत्र ड्मतुपि टिलोपे च कृते "स्वादिष्व"ति पदसंज्ञासम्पादनद्वारः रुत्वसम्पादकस्य स्थानिवत्त्वस्यानेन निषेधात् सकारान्तस्य पदत्वेन रुत्वं स्यात्। "तसौ मत्वर्थे" इत्यनेन भसंज्ञया पदसंज्ञाबाधस्तु न। अत्र सूत्रे उपस्थितत्वात्पदत्वद्वारिकैव परम्परा गृह्यत इति भत्वं प्रति स्थानिवत्वनिषेधाभावेन सकारान्तत्वाभावादिति वाच्यम्। पदे अन्तः इति सप्तमीसमासे पदपरकान्तावयवकर्मकविधावित्यर्थे पदसंज्ञायामपि निषेधाप्रवृत्तेः अत्र प्रत्यासत्त्या परपदस्थाजादेशस्यैव स्थानिवत्त्वस्य निषेध इति पदेऽन्त इति भाष्येण ध्वन्यत इति दिक्।

प्रश्नः—७६. "क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यान"मिति वार्तिकं सोदाहरणं व्याख्याय वरेयलोपविधिमिति सोदाहरणं व्याख्यायताम्।

उत्तरम्—अत्र वार्तिके क्विविधावित्यस्य क्वौ विधिं प्रति न स्थानिवत्, क्वौ लुप्त न स्थानिवदित्यर्थद्वयम्। आद्योदाहरणं यथा—'लवमाचष्टे लवयति लवयते रप्रत्यये लोरिति अत्र णावकारलोपस्य स्थानिवत्त्वनिषेधात् ऊठ्सिद्धयति। अन्त्योदाहरणं यथा - कण्डूयतेरप्रत्यये कण्डूरिति अत्राल्लोपस्य स्थानिवत्त्वनिषेधात् यण् न लुक्युदाहरणम् पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्र इति अत्र सास्य

देवतेत्यणो "द्विगोर्लुगनपत्ये" इति लुकि "लुक् तद्धित" इति ङीषो लुकि तस्यानेन स्थानिवत्त्वनिषेधात् सन्नियोगशिष्टन्यायेन आनुको निवृत्तिरिति। उपधात्वे, पारिखीय इत्यत्र परिखाशब्दादपि आकारलोपस्य स्थानिवत्त्वनिषेधात् पारिखे भव इति विग्रहे खोपधनिमित्तकच्छप्रत्ययसिद्धिः फलम्। वादितवन्तं प्रयोजितवान् अवीवदत् वीणां परिवादकेनेत्यत्र णौ णिलोपस्य स्थानिवत्त्वनिषेधात् ह्रस्वश्चङ्परनिर्ह्रास इत्यस्य फलम्। उपधात्वे यो निषेधः स प्रत्ययविधावेवेति पठयतीति सिद्धयर्थमवश्यमाश्रयणीयत्वेन नोपधात्वेन फलमिदं गतार्थम्। कुत्वस्य अर्चयतेरर्कः, मर्च्यतेर्मर्कः इत्यत्र णिलोपस्य स्थानिवत्त्वनिषेधाच्चोः कुरिति कुत्वं फलमिति।

ननु वरेयलोपविधिं प्रति न स्थानिवदित्युच्यते तत्र यायावरे आतोलोपविधिं प्रति स्थानिवत्त्वेन वरेयलोपग्रहणे कृतेऽपि दोषोऽस्त्येव अकारच्छेदं कृत्वा अवर्णलोपविधिं प्रति यलोपविधिं च प्रतीत्यर्थकरणेऽपि यातिरित्यस्यासिद्धिरिति चेच्छृणु। वरे इति भिन्नं वाक्यम् तस्य च वरच्प्रत्ययनिमित्तकलोपो न स्थानिवदित्यर्थः। निपातनात् द्वन्द्वः सप्तम्या अलुक् चेति यायावर इत्यस्य सिद्धिः। यलोपोदाहरणन्तु ब्राह्मणकण्डूतिरिति दिक्।

प्रश्नः—७७. द्विर्वचने चेति सूत्रे कत्यर्था भाष्ये समुद्भावितास्तत्र कः सिद्धान्तसिद्धोऽर्थः? पूर्वविप्रतिषेधवार्तिकेनास्य गतार्थत्वं न वेति सर्वं भाष्यप्रदर्शितदिशा व्यवस्थापयत।

उत्तरम्—द्विर्वचनेऽचीत्यनेन कार्यातिदेशस्वीकारे चक्रतुरित्यादौ नित्यत्वाद्यपि तस्य स्थानिवत्त्वे यणयुक्तस्यैव द्वित्वेन अभ्यासेऽकारश्रवणानापत्तेः, जेघ्रीयते इत्येतदर्थं क्रियमाणाज्ग्रहणाच्च स्थानिरूपातिदेशोऽत्र ज्ञाप्यते। अन्यथा "ईघ्राध्मो"रितीत्वेऽनेन स्थानिकार्यातिदेशात् द्वित्वेनेष्टसिद्धौ तद्ग्रहणं व्यर्थं स्यात्। न च रूपातिदेशस्वीकारे अधिजगे इत्यादौ अभ्यासे इकारश्रवणापत्तिरिति वाच्यम् "गाङ्लिटी"त्यत्र द्विलकारनिर्देशेन लकारादावित्यर्थं एशादेशात्पूर्वमेव गाङादेशेन स्थानिवत्त्वाऽप्राप्त्या रूपसिद्धेः न च अचि योऽजादेशः स द्वित्वे कार्ये स्थानिवदित्यर्थे अचिकीर्तत् जग्ले दुद्यूषति, विभवनीयिषतीत्यादौ अभ्यासरूपं न

सिद्धयति, अजादौ प्रत्यये योऽजादेशः स स्थानिवदिति द्वितीयार्थस्वीकारे दुद्यूषतीत्यत्र दोषपरिहारेऽपि अन्येऽपरिहृता एवेति वाच्यम्। द्विर्वचनशब्दस्याधिकरणल्युडन्तत्वादर्श आद्यजन्तत्वात् मत्वर्थीयाकारान्तत्वाद्वा द्वित्वनिमित्तेऽचि अजादेशः स्थानिवदिति तृतीयार्थस्वीकारेणादोषात्। अथाऽपि द्विर्वचनशब्दस्यैकत्वेन तस्याचि विशेषणे एवोपक्षीणत्वात् कालावधारणाभावेन कृतेऽपि द्वित्वे स्थानिवत्त्वेन दोषस्तदवस्थ एवेति चेन्न। न पदान्त इत्यतो नेत्यनुवृत्त्या द्वित्वनिमित्तेऽचि अजादेशो नेति चतुर्थपक्षाश्रयणेनादोषात्। न चैवमपि आदेशनिषेधे कालावधारणाभावोऽस्त्येवेति वाच्यम्। द्विर्वचनशब्दे एकशेषाश्रयणेन द्वित्वे कर्तव्ये इत्यादिपञ्चमार्थस्वीकारेण कृते द्विर्वचने स्थानिवत्त्वस्य आदेशनिषेधस्य वाऽलाभात्। अशितीत्यस्य प्रसज्यप्रतिषेधेन आदेशस्यानैमित्तिकत्वात् जग्ले, मम्ले इत्यादौ न दोषः। "ओः पुयण्ज्यपरे" इति सूत्रे वर्गप्रत्याहारजग्रहणेन णिच्यच आदेशो न द्वित्वे कर्तव्ये इति ज्ञापनेन नुवावयिषतीत्यादौ दोषाभावेन तदर्थं णौ स्थानिवदिति न कर्तव्यं भवति। तत्र नियमस्य सजातीयापेक्षत्वेन अवर्णान्तरत्वसम्पादकादेशस्थानिन एवादेशाभावो ज्ञाप्यते तेन अचिकीर्तदित्यादौ न दोष इति।

ननु पपतुः आटिटदित्येतदर्थं सूत्रमिदं न कर्तव्यम्। "द्विर्वचनं यणयवायावादेशाल्लोपोपधालोपणिलोपकिकिनोरुत्वेभ्यः" इति वार्तिकेनैव सिद्धेः। तत्र चुक्षावयिषतीत्यादौ अन्तरङ्गत्वात् द्वित्वात्पूर्वं वृद्ध्यावादेशयोरभ्यासे उकारश्रवणाय अन्यार्थं क्रियमाणमुत्वमधिकविषये उपजीव्यते, तथा चायं न्यासः "उत्परस्यातः", "ति च", "ओदौदादेशस्य चुट्टुतुशरादेः" अभ्यासस्येत्यनुवर्तत इति नापूर्वोत्वविधानप्रयुक्तगौरवमपि तु "सन्यत" इतीत्वेनैव सिद्धे "ओः पुयणि"त्यकरणेन लाघवमेवेति चेन्न। पिपविषते यियविषतीत्येतदर्थमित्वविधानस्य वार्तिकारम्भेऽपि वक्तव्यत्वेन तदेव सूत्रारम्भे प्रसङ्गात् ज्ञापनार्थं भविष्यतीति गौरवानवकाशात्। किञ्च अजीजवदित्यर्थं "जोर्न" इत्युत्वप्रतिषेधवचनावश्यकत्वेन वार्तिकद्वयस्य गुरुभूतशरीरेण च वार्तिकारम्भपक्षे गौरवात्। तस्मात् सूत्रेण वार्तिकप्रत्याख्यानमेव वरमिति दिक्।

अथ नवमाह्निकम्

प्रश्नः—७८. "प्रत्ययस्य लुक्श्लुलुपः" इति सूत्रस्थप्रत्ययग्रहणस्य प्रयोजनं भाष्यदर्शितदिशा दर्शनीयम् ।

उत्तरम्—ननु एकयोगनिर्दिष्टानामिति परिभाषया "लुक् तद्धित लुकी"ति सूत्रे "गोस्त्रियो"रिति सूत्रात् गोशब्दस्याप्यनुवृत्त्या पञ्चगुरित्यत्र क्रीतार्थकठको लुकि "लुक्तद्धिते"ति गोर्लुग्वारणाय, कंसाय हितं कंसीयं कंसीयस्य विकारः कांस्यमित्यत्र "कंसीयपरशव्ययो"रिति यञि छस्य क्रियमाणे लुकि समुदायस्य लुक्प्रसङ्गवारणाय च अत्र सूत्रे प्रत्ययग्रहणं न कर्तव्यम् । लुक्तद्धिते"ति सूत्रे स्वरितत्वबलात् स्त्रीमात्रस्यैवानुवृत्तेः, "कंसीयपरशब्दयोर्यञञौ भवतश्छयतोश्चे"ति विशिष्टनिर्देशाच्च प्रत्ययमात्रस्यैव लुक्सिद्धेः । त्रिश्वाङ्गभपदसंज्ञार्थं प्रातिपदिकाधिकारस्यावश्यकत्वेन प्रातिपदिकात्परस्य लुगित्यर्थे परिशेषाच्छयतोरेव लुग्विधानेनेष्टसिद्धेः । नापि "जनपदे लुबि"त्यादौ स्थानिप्रक्लृप्त्यर्थं प्रत्ययग्रहणम् । "प्रत्ययः परश्चे"त्यनुवृत्त्या तत्सिद्धेः । न च लुक्श्लुलुपः सर्वादेशा यथा स्युरित्यर्थं प्रत्ययग्रहणमिति वाच्यम् । लोपानुवृत्त्यैव सिद्धे यत् 'लुग्वा दुहे"ति सूत्रे लुग्ग्रहणं क्रियते तेन लुक्श्लुलुपः सर्वादेशा भवन्तीति ज्ञापनादिति चेदेवं तर्हि उत्तरार्थं प्रत्ययग्रहणम्, कृत्स्नप्रत्ययलोपे प्रत्ययलक्षणं यथा स्यादेकदेशलोपे मा भूदिति तेन आघ्नीतेत्यादौ नानुनासिकलोप इति दिक् ।

प्रश्नः—७९. प्रत्ययलोपसूत्रे प्रथमप्रत्ययग्रहणप्रयोजनं तत्प्रत्याख्यानप्रकारञ्चोपपाद्य द्वितीयप्रत्ययग्रहणप्रयोजनमपि विवेचनीयम् ।

उत्तरम्—प्रत्ययलोपसूत्रे प्रथमप्रत्ययग्रहणाभावे लोपे सति प्रत्ययस्य लक्षणम्—प्रादुर्भाव इत्यर्थे सौरथी, वैहतीत्यादौ मकारनकारयोर्भावे यथा गुरूपोत्तमत्वात् ष्यङ् भवति एवं लोपेऽपि स्यात् । कृते तु प्रत्ययग्रहणे प्रत्यासत्त्या प्रत्ययनिमित्तं कार्यं प्रत्ययलोपे सति भवतीत्यर्थान्न दोषः । ननु

"लोपे प्रत्यय" इत्येव सिद्धे लक्षणपदोपादानं करणसाधनपरं तेन प्रत्ययनिमित्तं कार्यं लोपेऽपि भवतीत्यर्थान्नात्र दोषः। न च ग्रामणि कुलमित्यत्र ह्रस्वे कृते तुग्वारणाय प्रत्यये सति यद्भवति तदेव कार्यं लोपेऽपीत्यर्थं तद्ग्रहणमिति वाच्यम्। अन्तरङ्गपरिभाषयैव तत्र तुगभावसिद्धेः। कृते च तस्मिन्नर्थे जगत् जनगदित्यत्र तुकोऽप्राप्तेश्चेति चेदुच्यते। कृत्स्नप्रत्ययलोपे एव प्रत्ययलक्षणं न तु प्रत्ययावयवलोपे, तेनाऽऽघ्नीयेत्यादौ नानुनासिकलोप इति इदमेव चाद्यप्रत्यय-ग्रहणं प्रत्ययावयवेऽपि प्रत्ययव्यवहारसाधकम्। यदि चैतत्सर्वं पूर्वसूत्रस्थप्रत्यय-ग्रहणेनैव ज्ञाप्यते तदाऽन्यतरच्छक्यमकर्तुमिति।

द्वितीयप्रत्ययग्रहणन्तु प्रत्ययस्य यत्र प्राधान्येनाश्रयणं तदेव कार्यं प्रत्यय-लक्षणे सति भवति न वर्णलक्षणमिति ज्ञापनार्थम्। तेन गवे हितं गोहित-मित्यादौ अवादेशो नेति दिक्।

प्रश्नः—८०. लुक्युपसंख्यानमिति वार्तिकोत्थानबीजं तत्प्रत्याख्यान-प्रकारञ्च दर्शयित्वा "प्रत्ययलोप" इति सूत्रसत्त्वे प्राप्तदूषणानि भाष्य-रीत्या निराकरणीयानि।

उत्तरम्—ननु तक्रकौण्डिन्यन्यायेन लोपसंज्ञाया लुगादिसंज्ञया बाधात्पञ्चे-त्यादौ पदत्वं न स्यादित्यर्थं लुकि प्रत्ययलक्षणोपसंख्यानं न कर्तव्यम्। अदर्शन-सामान्यस्य लोपसंज्ञाविधानात्। न चैवं लुगादिसंज्ञानां साङ्कर्येण अस्ति हन्तीत्यादौ "श्लावि"ति द्वित्वं स्यादिति वाच्यम्। पृथक्संज्ञाकरणेन एषु तद्भावितपक्षाश्रयणात्। लुमसंज्ञया लोपसंज्ञाया भेदेनोपादानाग्न लुमत्संज्ञया लोपसंज्ञाया ग्रहणम्। तेन गोमतीभूतेत्यादौ च्वेर्लोपे "लुक् तद्धितलुकि" इति ङीषो लुङ् न। पृथक् संज्ञाकरणेन लोपसंज्ञायां तद्भावितपक्षाश्रयणन्तु न लुम-त्संज्ञासु यदुच्यते तल्लोपमात्रे मा भूदित्यर्थं पृथक् लोपसंज्ञावचनस्यावश्यकत्वात्। सत्यपि तद्भावितपक्षाश्रयणे "न लुमते"ति निषेधारम्भेण लुकि प्रत्ययलक्षणं भविष्यतीति।

ननु यस्य सतः कार्यं प्रति निमित्तत्वं नाभूत्स लुप्तोऽपि निमित्तं न स्या-दिति राजपुरुष इत्यादौ पदसंज्ञायां ङस्प्रत्ययोऽनिमित्तमिति लुप्तेऽपि सोऽनि-

मित्तं स्यादिति प्रत्ययलक्षणेन समानाधिकरणत्वात् सुबन्तं पदमिति प्राप्तामपि पदसंज्ञां प्रबाध्य भसंज्ञा स्यादिति चेन्न "न ङी"ति ङौ प्रतिषेधेन प्रत्यय-लक्षणेन भसंज्ञा नेति ज्ञापनात्। ननु अनेनैव प्रत्ययनिमित्तकार्य्याणि लुप्तेऽपि प्रत्यये भवन्तीति क्रमाभावात् पश्वोरित्यादौ तु दीर्घत्वयोः पूर्वविप्रतिषेधानु-पपत्तिरिति चेन्न अस्य तत्तच्छास्त्रनिमित्तसम्पादनद्वारा तत्तच्छास्त्रप्रवृत्ति-सम्पादकत्वेन पूर्वविप्रतिषेधोपपत्तेः। न च चित्रायां जाता चित्रेत्यत्र प्रत्यय-लक्षणेनाणन्तत्वान्ङीबापत्तिः, वतण्डीत्यत्र प्रत्ययलक्षणेन यञन्तत्वात् ष्फप्रत्यया-पत्तिः, गामिच्छति गव्यतीत्यत्र प्रत्ययलक्षणेनाम्परत्वादात्वापत्तिश्चेति वाच्यम्। अण् योऽकारः, यञ् योऽकारः, अचमोतिरीत्या व्याख्यानेन वर्णाश्रयत्वात्प्रत्यय-लक्षणाप्रवृत्तेरिति दिक्।

प्रश्नः—८१. प्रत्ययलोपसूत्रे न्यासान्तरारम्भबीजं प्रदर्श्य तन्निरासप्र-कारञ्च विस्पष्टमुपपाद्य अस्य विध्यर्थत्वं नियमार्थत्वं वेति विशदं प्रतिपादनीयम्।

उत्तरम्—ननु लुप्ते प्रत्यये सर्वाणि कार्याणि अनेनैव प्रत्युत्थाप्यन्त इति तुग्दीर्घत्वयोर्विप्रतिषेधानुपपत्तिरिति शङ्कासमाधानाय स्थानिसंज्ञाऽन्यभूतस्या-नल्विधाविति न्यासान्तरारम्भः। अस्मिन् न्यासे स्थानिवद्भाववचनाकरणेन लाघवम्। हन्तेस्तु स्वसंज्ञाशास्त्रेण हन्तेरेव संज्ञा तेन वधेरपि आत्मनेपदविधान-सङ्गतिः राजपुरुष इत्यादौ भसंज्ञा, चित्रेत्यादौ ङीप्, वतण्डीत्यादौ ष्फः, गव्यतीत्यादौ आत्वम् प्रत्ययलक्षणेन न भवन्ति अल्विधित्वात्। अनेनाऽऽदेशे स्थानिव्यवहारमात्रातिदेशेन विप्रतिषेधोपपत्तिरपि। एवं तर्हि न्यासान्तरं कथमुपेक्षितमिति चेदुच्यते आर्द्रे चर्मन्नित्यत्र भसंज्ञाया अल्विधित्वादप्राप्तौ नलोपनिषेधाय "न ङिसम्बुद्ध्यो"रिति सूत्रे ङिग्रहणे, आशीरित्यर्थम् "आशासः क्वावुपधाया इत्व"मिति वार्तिककरणे च गौरवात् सूत्रभेदापत्तेश्च न्यासान्तर-मुपेक्षितमिति।

ननु स्थानिवद्भावेनैव सिद्धे सूत्रमिदं व्यर्थमिति चेन्न। शास्त्रेण करणेन आचार्यः स्मर्ता सत्—विद्यमानं वस्तु निमित्तत्वेनान्वाचष्टे, अथवा शास्त्रस्यै-वाविच्छेदेन प्रवर्तमानस्य स्वतन्त्रत्वमन्वाख्यायते। न च किञ्चिन्निमित्तं गोमा-

लक्षणं नेति न्यासान्तरे न दोषः। राजकुमार्याविंत्यादौ दोषवारणाय प्रत्यये शाकलं नेति वक्तव्यमिति वाच्यम्। परमदिवेत्यत्र "दिव उदि"ति उत्त्वापत्तेः। उत्त्वस्य परिगणनानन्तर्गतत्वादिति चेन्न। उत्तरपदाधिकारस्थवचनसामर्थ्येनाद्युदात्तत्वसिद्धेः। नन्वेवं परमवाचेत्याद्यर्थमुत्तरपदत्वे इति वार्तिकं कर्तव्यमिति चेन्न। "यचि भमि"त्यत्र यस्मात् स्वादिविधिस्तदादिसुबन्तञ्चेत्यनुवृत्त्या यजादौ प्रत्यये भ भवति यस्मात् स्वादिविधिस्तदादिसुबन्तञ्च भं भवतीत्यर्थे परमवाचेत्यादौ भत्वेन कुत्वाप्राप्तेः। असर्वनामस्थाने इति च पर्युदासप्रतिषेधस्तेन सर्वनामस्थाने व्यापाराभावेन परमवागित्यादौ पूर्वेण पदत्वसिद्धिः। अथवाऽनन्तरस्येति न्यायेन पूर्वाप्राप्तिरप्रतिषिद्धा तया भविष्यति। न चैवमपि परमवाचावित्यादौ अन्तर्वर्तिविभक्त्या पदत्वं स्यादेवेति वाच्यम्। "स्वादिषु" इत्येको योगः। स्वादिषु पूर्वं पदं भवतीति तदर्थः। ततः 'सर्वनामस्थानेऽयचि" यजादौ सर्वनामस्थाने पदं नेत्यर्थः। ततो "भम्" भं भवति यजादावसर्वनामस्थाने। इत्थं योगविभागेन सर्वा प्राप्तिः प्रतिषिध्यते तेन सकलेष्टसिद्धेः। दधिसेचावित्यादौ षत्ववारणाय "सात्पदाद्योरि"त्यत्र पदादादिः पदादिरिति पञ्चमीसमासः। ऋक्षिवत्यादौ नानेन षत्वनिषेधः। सातिग्रहणेन स्वादिष्विति पदत्वमादाय निषेधो नेति ज्ञापनात्। बहुसेचावित्यत्र षत्वाभावाय, वार्तिकारम्भे कुत्वाभावायेव योगविभागेन तत्प्रत्याख्याने सात्पदाद्योरित्यत्र बहुचपूर्वस्य चेति व्यक्तव्यमिति। वस्तुतस्तु प्रत्याख्यानस्य गौरवदुर्ज्ञेयत्वाभ्यामयुक्तता। तस्मात् पदादिविधावेव प्रत्ययलक्षणं, न पदान्तविधाविति नियमार्थं नञ्रहितम् 'उत्तरपदत्वे च पदादिविधा'वित्येव वक्तव्यम् इति दिक्।

"सर्वनामस्थानेऽयचि" इति योगविभागपक्षे यजादौ सर्वनामस्थाने पदसंज्ञानिषेधेऽपि हलादावनिषेधेन सावपि पदं भवतीति पक्षो लभ्यते, न च भद्रंकरोषि गौरित्यत्र "एचोऽप्रगृह्यस्ये"त्यनेन पूर्वस्यार्धस्याऽऽत् परस्येत् स्यात् पदान्तग्रहणेऽक्रियमाणेऽपि सौ पदत्वसुलभादिति वाच्यम्। वाक्यान्तस्येत्येवं व्याख्याने, औकारस्य वाक्यान्तत्वाभावेनादोषात्।

प्रश्नः—८३. न लुमता तस्मिन्निति न्यासोत्थानबीजं प्रदर्श्य यथान्यासेन कथमस्यान्यथासिद्धत्वमिति दर्शनीयम्।

उत्तरम्—अङ्गस्येति स्वर्यते, तनाङ्गाधिकारविहितं यत्कार्यं तल्लुमता लुप्ते प्रत्यये नेति सूत्रार्थं जिगमिष, संविवृत्स, उत्क्रामेत्यादौ हेलुंकि इड्विधिप्रतिषेधयोर्दीर्घस्य चाप्राप्तिः। प्रत्ययलक्षणनिषेधात्। तेन न लुमता तस्मिन्निति न्यासो विधेयः। लुमता लुप्तो यः प्रत्ययस्तस्मिन् यत् कार्यमाङ्गमनाङ्गं वा तन्नेति तदर्थः। "गमेरिट्" इत्यत्र "न वृद्भ्यः" इत्यत्र च सकारादावित्युच्यते तद्विशेषणं परस्मैपदग्रहणम् एवं "क्रमः परस्मैपदेष्वि"त्यत्र शितीत्युच्यते तद्विशेषणं परस्मैपदग्रहणं तथा च परस्मैपदपरसादेरङ्गत्वनिमित्तस्येट् इत्यार्थे हेः कार्यं प्रति निमित्तत्वाभावेन तत्र तत्र दोषाभावः। न च अवधि, अगायि, अध्यगायीत्यादौ तलोपे लुङ्निमित्तवधाद्यादेशानुपपत्तिरिति वाच्यम्। लुङ्परार्धधातुकविषये वधाद्यादेशविधानेन निषेधाप्रवृत्तेः। यदि च अङ्गस्येति न स्वर्यते तदा लुमता लुप्तप्रत्ययनिमित्ताङ्गस्य यत् कार्यमाङ्गमनाङ्गं वा तत् नेत्यर्थे यथाश्रुतन्यासे दोषाभावेन न्यासान्तरो व्यर्थः। सर्वस्तोमादौ स्वरस्तु सौवरीणां सप्तमीनां तदन्तसप्तमीत्वादेव सिद्ध इति दिक्।

प्रश्नः—८४. "अलोऽन्त्यात्पूर्व उपधा" इति सूत्रे अल इति अन्त्यादित्यस्य विशेषणम् उपधेत्यस्य वेति निरुच्य "नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे" इति परिभाषाया भाष्योक्तप्रत्याख्यानप्रकारः प्रदर्श्यताम्।

उत्तरम्—अत्र सूत्रे अल इति पञ्चम्यन्तमन्त्यादित्यस्य विशेषणम्। न चैवमल उपधाविशेषणत्वाभावेन वर्णस्येव सङ्घातस्याप्युपधासंज्ञायां शिष्टादित्यादौ विशिष्टस्येत्वापत्तिः स्यादिति वाच्यम्। उपधाया इति षष्ठीश्रुत्या अलोऽन्त्यपरिभाषया दोषवारणसम्भवात्। "नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे" इति परिभाषा तु नास्त्येव।

न च "अव्यक्तानुकरणस्ये"ति सूत्रेणान्त्यस्य पररूपवारणाय साऽऽवश्यकीति वाच्यम्। नाम्रेडितसूत्रेऽन्त्यग्रहणेन नान्त्यस्य पररूपं भवतीति ज्ञापनेनादोषात्। "घ्वसोरेद्धावि"ति सूत्रे पुनर्लोपवचनसामर्थ्यात् द्विशकारनिर्देशाद्वा समुदायस्यैव लोपसिद्ध्या, "हलि लोपः" इत्यत्र "अनाप्यक" इत्यत अनित्यनुवृत्त्या षष्ठ्या विपरिणामेन अन एव लोपविधानेन, "अत्र लोपोऽभ्यासस्ये"ति सूत्रे अत्रग्रहणसामर्थ्यात् सर्वस्यैव लोपसिद्ध्या च प्रकरणाद् व्याख्यानाच्च,

सन्निधकारस्य, सनि सकारादेः, प्रकृतेः विषयस्य च ज्ञानसिद्धया परिभाषा विफलैवेति दिक् ।

प्रश्नः—८५. तस्मिन्निति निर्दिष्टे पूर्वस्येति सूत्रे निर्दिष्टग्रहणस्य फलं सूत्रस्य नियमार्थत्वञ्च प्रदर्श्य षष्ठीप्रकल्पकत्वपदस्य समर्थनं कृत्वा तस्यैकदेशयुक्तित्वं समर्थ्यताम् ।

उत्तरम्—अत्र सूत्र 'इति' शब्दो न स्वरूपपदार्थको येनेदं "तस्मिन्नणि चे"त्यादावेवोपतिष्ठेत न पुन"रिको यणची"त्यादौ । किन्तु अर्थनिर्देशार्थ एव । तथा च सप्तम्यन्तार्थकसर्वनाम्ना निर्देशे कृते सप्तम्यन्तार्थऽव्यवहितोच्चारितेऽचीत्यादि सप्तम्यन्तपदघटितेऽप्युपतिष्ठते । ननु अर्थनिर्देशार्थेति पदोपादाने अर्थेन पौर्वापर्य्याभावात् "जनपदे लुब"त्यादावस्यानुपस्थितौ तदर्थं निर्दिष्ट-ग्रहणं व्यर्थमिति चेन्न, आनन्तर्यमात्र कार्यं यथा स्यान्न पुनरान्तर्य्येऽपीति ज्ञापनार्थत्वात् । तेन समिधावित्यादौ न दोषः ।

"इको यणची"त्यादेरजुपश्लिष्टस्येको यणित्यर्थे सुध्युपास्य इत्यादौ पूर्वस्येव परस्य अव्यवहितस्येव व्यवहितस्य च प्राप्तौ पूर्वस्यैवाव्यवहितस्यैवेति नियमार्थमिदं सूत्रम् । न च "ङमो ह्रस्वादची"त्यादौ उभयनिर्देशेन पूर्वस्य कार्यं स्यात्परस्य वेति सन्देह इति वाच्यम् । परत्वादनवकाशत्वाच्च पञ्चमीनिर्देशस्य बलीयस्त्वेनासन्देहात् ।

अथवा "षष्ठी स्थाने" इत्यतः षष्ठीत्यनुवर्त्य सप्तमीनिर्देशे पूर्वस्य पञ्चमीनिर्देशे परस्य षष्ठी प्रकल्पयते । यत्राऽपि षष्ठ्या निर्देशः क्रियते तत्राऽपि पूर्वस्यैव षष्ठी प्रकल्प्यते न परस्येति षष्ठीप्रक्लृप्त्यैव नियमफललाभान्नात्र पक्षे नियमानुपपत्तौ दोषः । प्रत्ययविधौ "गुप्तिज"त्यादौ षष्ठीप्रकल्पनेऽपि आन्तर्यतः सनः सनेवादेशो भविष्यतीति न दोषः । न चाऽऽदेशस्याऽपदेशाभावादित्संज्ञा न सिद्ध्येदिति वाच्यम् । षष्ठीप्रक्लृप्तेः प्रागेवान्तरङ्गत्वात् सूत्रे एवेत्संज्ञालोपाभ्यां सादेशविधानेनादोषात् । परत्वाविशिष्टसन उत्पादेन पञ्चम्या उपक्षये प्रकल्पकत्वायोगाच्च । न च "इको यणची"त्यादौ पूर्वस्य जायमानो यणपि पूर्व एवेति तत्रापि षष्ठीप्रकल्पने प्रकृतिविकारव्यवस्थाऽनु-

पपत्तिरिति वाच्यम् । लिङ्गाच्छ्रुतेर्बलीयस्त्वेन सौत्रषष्ठ्यैव स्थान्यादेश विश्रान्त्या प्रक्लृप्तेरयोगात् । आन्तर्यतो यणो यणेव भविष्यतीत्यदोषाच्च । अवर्णादचि अवर्णस्याचश्चैको गुणो भवतीत्यर्थेनैव सिद्धे "एकः पूर्वपरयो"रिति पूर्वपरग्रहणेन नोभे युगपत्प्रकल्पिके भवत इति ज्ञापनेन "ङमो ह्रस्वादचि"ति सूत्रे नोभयत्र षष्ठीप्रक्लृप्त्यापत्तिरिति ।

सप्तमीनिर्देशस्य क्वचित्पूर्वत्र क्वचिदुत्तरत्रावश्यकत्वेन उभयनिर्देशे, षष्ठीपदानुवृत्तौ वा, उभयोर्युगपत्प्रकल्पकत्ववारणाय ज्ञापकाश्रयणे च गौरवादस्यैकदेश्युक्तित्वमिति दिक् ।

प्रश्नः—८६. सपदकृत्यं स्वं रूपसूत्रं व्याख्याय भाष्यरीत्या सूत्रं प्रत्याख्यायताम् ।

उत्तरम्—ननु असमानाधिकरणयोरपि संज्ञासंज्ञिभावदर्शनेन शब्दस्य स्वमित्यन्वयेऽपि संज्ञासंज्ञिभावावगमे सिद्धे आत्मीयवाचिस्वपदेनान्तरङ्गत्वात् रूपप्रतीतिसम्भवे च रूपग्रहणं व्यर्थमिति चेन्न । अर्थयुक्तमेव रूपं गृह्यत इति ज्ञापनार्थत्वात् । तेनार्थवद्ग्रहणपरिभाषा न कर्तव्या भवति ।

लोके यथोच्चारितेन शब्देनार्थो गम्यते तद्वच्छास्त्रेऽपि "अग्नेर्ढगि"त्यादिनाऽर्थस्यैव प्रतीतिः । न चार्थेभ्योऽङ्गारेभ्यः प्रत्ययविधानं सङ्गच्छते, अथ न पौर्वापर्याभावात् । तेन तद्वाचकेभ्यः सर्वेभ्यः प्रत्ययविधानं प्राप्नोति अतः सूत्रमिदमारब्धम् । ननु लोके आयनादिकार्यानुरोधेनार्थस्य प्राधान्येऽपि शास्त्रे तद्बाधादर्थस्य विशेषणत्वमेवेति सूत्रं व्यर्थम् । तत्रोपस्थितार्थस्य त्यागे मानाभावेनार्थवत् परिभाषाऽपि सिद्धेति चेन्न । शब्दसंज्ञायां स्वरूपविधिर्नेति लाभार्थमस्यावश्यकत्वात् । अन्यथा घु-घ' ग्रहणेन प्रदेशेषु तयोरेव ग्रहणं स्यान्न तु दा-धा-तरप्-तमपाम् । तथा च "उपसर्गे घोः कि"रिति घुधातोरेव स्यात्, घरूपेति ह्रस्वश्च कुमारीघ इत्यत्रैव स्यात् । घुसंज्ञाविधानं तु "ई हल्यघो"रित्यत्र, घसंज्ञाविधानं च "किमेत्तिङव्ययघादि"त्यत्र चरितार्थम् । यदि च शब्दसंज्ञावचनसामर्थ्यादेव सब्दसंज्ञायां स्वरूपविधिर्नेति लभ्यते तदा सूत्रमिदं व्यर्थम् । "ई हल्यघोः, किमेत्तिङव्ययघादि"त्ययेतावन्मात्रप्रयोजने तु तत्रैव

दाधाग्रहणं तरप्तमब्ग्रहणञ्च कुर्यात् । न च वचनप्रामाण्यात्संज्ञिनां स्वरूप-ग्रहणाच्च संज्ञाया ग्रहणं स्यादिति वाच्यम् । "ष्णान्ता षडि"त्यनेन षान्तस्य संज्ञाविधानेन शब्दसंज्ञायां स्वरूपविधिर्नेति ज्ञापनात् । व्याख्यानाच्च "विभाषा वृक्षे"त्यत्र विशेषाणामेव, "स्वे पुष" इत्यत्र स्वरूपस्य विशेषस्य पर्य्यायस्य च, "सभाराजे"त्यत्र पर्य्यायस्यैव, "पक्षिमत्स्ये"त्यत्र तद्विशेषाणामेव ग्रहणेन सर्वेष्ट-संग्रह इति दिक् ।

प्रश्नः—८७. अणुदित्सूत्रेऽप्रत्ययग्रहणफलमुपवर्ण्य अणग्रहणप्रत्याख्यान-प्रकार उच्यताम् ।

उत्तरम्—अनभिधानात्प्रत्यये, "वृतो वे"ति सूत्रारम्भसामर्थ्यादागमे, "अष्टन आ विभक्ता"वित्यत्र दीर्घोच्चारणेन आदेशे सवर्णग्रहणाप्रसक्तौ अप्रत्यय-ग्रहणमेकदेशानुमत्या भाव्यमानेन सवर्णानां ग्रहणं नेति ज्ञापनार्थम् ।

स्वरानुनासिक्यकालभेदात् अण् सवर्णान्न गृह्णीयादित्यर्थमत्र सूत्रेऽण्-ग्रहणम् । ननु क्रियमाणेऽप्यण्ग्रहणे अक इत्यादौ ईकारादीनामागादिसंज्ञा-भिर्ग्रहणं न स्यात्, वर्णसमाम्नाये तेषामनुच्चारणात् । न चोच्चारणेन संज्ञया च प्रतीयमाना ह्रस्वा दीर्घसम्प्रत्यायने समर्था इति वाच्यम् । उच्चार्यमाण एव शब्दः प्रत्यायको न सम्प्रतीयमान इति सिद्धान्तात् । न च वर्णसमाम्नाये इकारादीनामुच्चारणेन तत्रैवास्य प्रवृत्तौ सवर्णग्रहणं सुपपादमिति वाच्यम् । वाक्यापरिसमाप्तिन्यायेन तदानीमनिष्पन्नस्यास्यान्यप्रत्यायने सामर्थ्याविर-हात् । किञ्च व्यक्तिपक्षे प्रत्याहारमद्वारीकृत्य निर्देशे "अस्य च्वा"वित्यादौ सवर्णग्रहणं न स्यात्, अनण्त्वात् । सूत्रस्य तु न वैयर्थ्यम्, ककारादिचिह्न न प्रत्याहारस्थोऽयमिति प्रत्यभिज्ञयाऽष्टादशादीनां ग्रहणाय तस्य साफल्यात् । इति चेदेवं तर्हि सवर्णेऽणग्रहणमपरिभाष्यम् । अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति तथैवेवर्णाद्यकृतः । न च श्रुतिभेदेनाकाराऽऽकारयोराकृतिभेदात् कथमाकृतिग्रहणात् सिद्धमिति वाच्यम् । कृशे स्थूले च गोपिण्डे गोत्वयोगवत् श्रुतिभेदेऽपि एकाकृतेरनपायात् । न च व्याप्यजात्या भेदोऽस्त्येवेति वाच्यम् । व्यापकधर्मेण समानाधिकरणव्याप्यधर्मकृतो भेदो न भेदबुद्धिं जनयतीति

स्वीकारात्। आकृतिग्रहणादेव "झलो झलि" इत्यादौ सवर्णतकारग्रहणसिद्धिः। खट्वाभिरित्यादौ न दोषः। "अतो भिस" इत्यादौ तपरकरणेन भिन्नकालाग्रहणात्। व्यक्तिपक्षेऽपि रूपसामान्येन सर्वव्यक्तीनां ग्रहणसिद्धेऽण्ग्रहणं व्यर्थमेवेति दिक्।

प्रश्नः—८८. "तपरस्तत्कालस्ये"ति न्यासं समर्थ्य अत्र नियामकप्रापकयोः किं युक्तमिति विविच्य द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कर्तव्यमिति वार्तिकोत्थानबीजं तत्प्रत्याख्यानप्रकारञ्च निर्दिश्य ध्वनिस्फोटश्च शब्दानामित्यस्यार्थं स्फुटं ब्रूत।

उत्तरम्—ननु तः परो यस्मात् इति बहुव्रीहिणा तत्पदेन वर्णः प्रतिनिर्दिश्यते स कालो यस्येति कालसामानाधिकरण्येन तदित्यनेन काल इति वर्णस्य कालेन सामानाधिकरण्यमयुक्तं तेन तत्कालकालस्येति निर्देशः कर्तव्य इति चेन्न। उष्ट्रमुखवत् तस्य काल इव कालो यस्येत्युत्तरपदलोपेन, कालसहचरितवर्णोऽप्युपचारात् काल एवेति स्वीकारेण च यथोक्तनिर्देशसङ्गतेः।

अत्र सूत्रेऽण्ग्रहणानुवृत्त्या यद्यस्य नियमार्थत्वं स्वीक्रियते तदा गुणानां भेदकतया दीर्घविधौ स्वरभिन्नानामुदात्तादीनां ग्रहणं न स्यात्। न च तपरकरणात् सूत्रस्याऽऽवृत्तौ आवृत्तस्याण्ग्रहणानुवृत्त्या विध्यर्थत्वान्न दोष इति वाच्यम्। तपरकरणस्यैजर्थत्वेन साफल्यात्। यद्यण्ग्रहणनिवृत्त्या विध्यर्थत्वं स्वीक्रियते, तदाऽनणि अस्य चारितार्थ्येनापि "अतो भिस ऐस्" इत्यादौ पूर्वसूत्रेण दीर्घप्लुतयोरपि ग्रहणं स्यात्, तस्मात् कतरः पक्षो ज्यायानिति चेदुच्यते। ह्रस्वेऽतपरेऽणि सवर्णग्रहणस्य तपरे दीर्घे समकालबोधकस्यावश्यकत्वेन ह्रस्वे तपरे द्वयोः प्राप्त्या विप्रतिषेधेन समकालस्यैव ग्रहणेनास्य विध्यर्थत्वमेव युक्तम्।

यद्ययं भिन्नकालानां व्यावर्तकस्तत्कालानां ग्राहकस्तदा द्रुतायां वृत्तौ ये वर्णास्त्रिभागाधिकाधिकास्ते मध्यमायां ये च मध्यमायां वृत्तौ वर्णास्त्रिभागाधिकास्ते विलम्बितायामिति कालभेदाद् द्रुतायां वृत्तौ तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कर्तव्यमित्याशङ्क्य यथा गन्तॄणामालस्यादिभेदेन गतिभेदेऽपि न मार्गभेदस्तथा वक्तुश्चिराचिरवचनैर्वृत्तीनां द्रुतादीनां विशेषत्वेऽपि न सर्वासु वृत्तिषु वर्णानामुपचयापचयौ भवत इत्युत्तरितम्। यदि तु अध्वनो गन्तृक्रिया-

जन्यत्वाभावेन व्यवस्थिता एव ते, वर्णानान्तु प्रयत्नजन्यत्वेन प्रयत्नभेदेन वर्णा भिन्ना एवेत्युच्यते तदा स्फोटः शब्दः ध्वनिस्तु व्यञ्जकत्वेनोपकारकः शब्दगुणः भेरीवातवत्। वृत्तिषु ध्वनीनां कालभेदेऽपि विषयस्त्वभिन्न एव। उक्तञ्च—

> "ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।
> अल्पो महांश्च केषांचिदुभयं तत्स्वभावत" इति॥

अस्यार्थस्तु ध्वनिर्व्यंञ्जकः स्फोटो व्यङ्ग्यः। तत्र व्यङ्ग्यानां शब्दानां सम्बन्धी व्यञ्जकत्वेन यो ध्वनिः स एव अल्पो महांश्च लक्ष्यते व्यङ्ग्यस्त्वभिन्नकाल एव। तत्र व्यक्तानामुभयं व्यङ्ग्यो व्यञ्जकश्च गृह्यतेऽव्यक्तानान्तु ध्वनिरेवेति दिक्।

प्रश्नः—८९. येन विधिरित्यस्य तदन्तविधिविषयत्वं निर्णीय ग्रहणोपाधीनां तदन्तोपाधिप्रसङ्गो वार्यताम्।

उत्तरम्—ननु "येन विधि"रित्यस्य यत्सम्बन्धी विधिः स तदन्तस्य संज्ञेत्यर्थे "इको यणची"त्यादौ तदन्तविधौ दध्यत्रेत्यत्र "अलोऽन्त्य"परिभाषया दोषवारणेऽपि "एचोऽयवायाव" इत्यस्य एजन्तस्यायाद्यन्तादेश इत्यर्थेन चयनमित्यादौ सर्वादेशवारणेऽपि च "आद्गुण" इत्यादौ तदन्तविधौ खट्वेन्द्र इत्यादौ अवर्णान्तसमुदायस्याजादेश्च गुणप्रसङ्गाद्वैरूप्यप्रसङ्गः। स्योन इत्यत्र ऊनशब्दमाश्रित्य यण् नशब्दमाश्रित्य गुण इत्यन्तरङ्गत्वाद्गुणप्रसङ्गः। द्यौरित्यादावौत्वस्याल्विधित्वाभावेन निषेधाप्रसक्तया स्थानिवत्त्वेन सुलोपः प्रसक्तस्तदर्थं प्रकृते "विशेष्ये" तदन्तविधिरिति न्यासः कर्तव्य इति चेन्न। येनेति करणतृतीयान्तेन इतरव्यावृत्तिकरणरूपव्यापारवत्त्वेन विशेषणस्य लाभे "इको यणची"इत्यादौ विशेष्यासन्निधानेन तदन्तविधेरयोगादिति।

ननु विशेषणं यदि तदन्तस्य संज्ञा स्यात्तदा गृह्यमाणस्य विशेषणानि तदन्तस्य संज्ञिनो विशेषणानि भविष्यन्ति। यतः संज्ञा हि संज्ञिप्रत्यायने विशेषणभावमापन्ना कथमात्मनो विशेषणसम्बन्धमनुभवेत्, गुणानाञ्चेति न्यायात्। तथा च "उतश्च प्रत्यादि"ति सूत्रे असंयोगपूर्वग्रहणस्योकारान्तविशेषणत्वा-

पत्तौ अक्ष्णुहीत्यादावेव निषेधः स्यान्न तु शवनुहीत्यादौ। एवं "मुदोऽष्ठ्यपूर्वस्ये"ति सूत्रे ओष्ठ्यपूर्वग्रहणस्य ऋकारान्तविशेषणत्वे सङ्कीर्णमित्यत्रोत्त्वापत्तिः निपूर्तं इत्यत्रोत्त्वानापत्तिश्चेति चेन्न। विशेष्यविशेषणभावस्य कामचारत्वात्। अयमाशयः—वृद्धयादिसंज्ञाः प्रदेशेषु गुणप्रधानभावानपेक्षयैव संज्ञिनं प्रत्याययन्ति। तदन्तसंज्ञा तु तदपेक्षयैव। तेन विशेषणसम्बन्धोत्तरमेव विशेष्येणोकारादेः सम्बन्ध इति पूर्वोक्तदोषाभाव इति दिक्।

प्रश्नः—९०. सिद्धन्तु तदन्तान्तवचनादिति वार्तिकोत्थानबीजं प्रदर्श्य यथान्यासे वार्तिकार्थोपसंग्रहः क्रियताम्।

उत्तरम्—ननु सर्वके नीचकैरित्यादावकचि भिनत्तीत्यादौ श्नमि कृते शीभावसुब्लुगन्तोदात्तसिद्धये अकज्वतः सर्वनामाव्ययविधौ श्नम्वतो धातुविधावुपसंख्यानं कर्तव्यम्। अन्यथाऽकच्छ्नम्वतः सर्वनामाव्ययधातुग्रहणेनाग्रहणात् पूर्वविधयो न स्युरिति तदन्तान्तवचनस्येति वक्तव्यमिति चेन्न। तस्य अन्तस्तदन्तस्तदन्तोऽन्तो यस्य तस्य तदन्तस्येति उष्ट्रमुखवदुत्तरपदलोपेन यथास्थितन्यासेऽपि तथाविधार्थसम्भवात्। अथवा "नेदमदसोरको"रित्यत्र सककारयोः प्रतिषेधशासनेन ज्ञायते तन्मध्यपतितस्तद्ग्रहणेन गृह्यते तेन सर्वके इत्यादौ शीभावादिसिद्धिरिति दिक्।